IV & V TANTRAS

OF

VISHNUS'ARMAN.

EDITED BY

M. R. KA'LE, B. A.

COVER PRINTED AT THE BOMBAY VAIBHAV PRESS,

BOMBAY.

1912.

PRICE 10 As.




THE STUDENT'S EDITION.

OF THE

FOURTH & FIFTH TANTRAS

OF

VISHNUS'ARMAN.

Edited with a short Sans. Commentary, a literal English Translation of almost all the slokas occurring in it and of difficult prose passages, and critical. and explanatory notes in English.

BY

M. R. Ka'le B. A.

Author of "Higher Sanskrit Grammar" &c. &c.

PRINTED BY BHA'U SADASHIV NEVREKER, AT SUDHA'KER PRINTING PRESS,
NO. 1 GIRGAON BACK ROAD, BOMBAY.,
AND
PUBLISHED BY GOPAL RAMACHANDRA TENDULKER
Managing Proprietor of
The Oriental Publishing Company.
Kandewadi, Girgaon.
BOMBAY.

:o:

PRICE 10 As.

PREFACE.

———:0:———

The following is the 3rd part of the Student's Edition of the Panchatantra containing the fourth and the fifth Tantras. This edition is meant for such of the students as have not the means of securing private assistance. Any student who has mastered Sir Dr. Bha'ndárkar's 1st Book and the first 20 lessson of the Sec. Book, will understand the text withoutany difficulty, if he reads it along with the notes or the translation. A full translation has been given of all difficult S'lokas. But in the case of easier ones, the translation stops after giving a rendering of the unintelligible parts only. The same has been done with regard to the difficult prose passages. Thus there is scope left for the boys to exercise their owu brain power. A short com. explaining all difficult compounds, and giving the prose order of difficult s'lokas has been added. In the case of intricate passages I have added, sometimes a word, at others, a sentence or two to make the sense clear. The exigencies of space, however, did not permit me to add full explanations. But what is given is sufficient to make the text intelligible to a student of ordinary understanding. A special feature of the present ed. is this—that it gives different readings and some additional slokas found in two Mss. consulted by me.

The theme of the Fourth Tantra is 'The loss of what war gained' and is meant to illustrate the folly of losing what has once been acquired. This forms the subject of the introductory story and the sucessive tales arise out of this. The same principle, however, underlies, more or less, the differend stories. The number of stories comprised in this Tantra

varied in different editions. According to Wilson the number of stories is 12. The Nirnayasâgsr edition and the Ms. I have with me, have eleven stories or twelve with the introductory story. Dr. Buhler's ed, contains 15 stories or with the introductory one 16, while the present ed. has one more story.

The title of the Fifth Tantra is 'The doing of a thing without proper consideration' and illustrates the folly of precipitancy. Here too the same principle may be found to underlie, dirsclty or indirectly, the different stories mentioned.

The student will observe that the reflections and citations which are so profusely interspersd in the first three Tantras become much less copious in the last two-a circumstance which, however, much adds to the interest, if not to the utility, of the compilation.

M. R. K.

Girgaon Back Road,
BOMBAY.

अथ लब्धप्रणाशम् ।

अथेदमारभ्यते लब्धप्रणाशं नाम चतुर्थं तन्त्रम् । यस्यायमादिमः श्लोकः—

समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते ।
स एव दुर्गं तरति जलस्थो वानरो यथा ॥ १ ॥

तद्यथानुश्रूयते—अस्ति कस्मिंश्चित्समुद्रोपकण्ठे महाञ्जम्बूपादपः सदाफलः । तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म । अथ कदाचित् तस्य तरोरधस्तात्करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत् । ततश्च रक्तमुखेन स प्रोक्तः—भोः भवान्समभ्यागतोऽतिथिः । तद्भक्षयतु मया दत्तान्यमृतकल्पानि जम्बूफलानि । उक्तं च—

प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः ।
वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसंक्रमः ॥ २ ॥
न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥ ३ ॥
दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतम् ।
अतिथिं पूजयेद्यस्तु स याति परमां गतिम् ॥ ४ ॥
अपूजितोऽतिथिर्यस्य गृहाद्याति विनिश्वसन् ।
गच्छन्ति विमुखास्तस्य पितृभिः सह देवताः ॥ ५ ॥

लब्धस्य प्रणाशः स एव तत्संज्ञं तन्त्रम् । बुद्धिः न हीयते—बुद्धिलोपो न जायते । यो धैर्यमवलम्ब्य कर्तव्यं जानातीत्यर्थः । दुर्गं संकटं । सदा फलानि यस्य । ०सलिलात्—जलात् । सुकोमला चासौ वालुका च तया सनाथे युक्ते । अमृताद् ईषन्न्यूनानि अमृतकल्पानि । आपन्नः उपस्थितः । स्वर्गस्य स्वर्गाय वा संक्रमो यस्मात् । स्वर्गच्छतीति स्वर्गः संक्रमो यस्मादिति वा । यद्वा स्वर्गस्य संक्रमः । चरणशब्दः शाखाविशेषाध्ययनसंघपरः । श्राद्धे चोपस्थितमिति शेषः ।

---

१ प्रणाशनं. २ आद्यश्लो. ३ अतःपरं-प्राप्तमर्थं तु यो मोहात्सान्त्वनैः प्रतिमुञ्चति । स तथा वंच्यते मूढो मकरः कपिना यथा ॥ इत्यधि० ४ राजपुत्राः पृच्छन्ति कथमेतत् विष्णुशर्मा कथयति । इत्य० क्वचित् । ५ निविष्टः ६ भक्षय अमृततुल्यानि. ७ मूर्खः पण्डित एव वा, वैश्वदेवे समापन्नः; वैश्वदेवान्तमासन्नः. ८ स्वाध्यायं देशमेव च. ९ दूराद्यातमधिश्रान्तं.

एवमुक्त्वा तस्मै जम्बूफलानि ददौ। सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनमगात्। एवं नित्यमेव तौ वानरमकरौ जम्बूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्यै प्रयच्छति। अथान्यतमे दिवसे तया स पृष्टः—नाथ क्वैवंविधान्यमृतकल्पानि फलानि प्राप्नोषि। स आह—भद्रे ममास्ति परमसुहृद्रक्तमुखो नाम वानरः। स प्रीतिपूर्वमिमानि फलानि प्रयच्छति। अथ तयाभिहितम्—यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति तस्य हृदयममृतमयं भविष्यति।। तद्यदि मया भार्यया ते प्रयोजनं ततस्तस्य हृदयं मह्यं प्रयच्छ। येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान्भुनज्मि। स आह—भद्रे मामैवं वद। यतः स प्रतिपन्नोऽस्माकं भ्राता। अपरं व्यापादयितुमपि न शक्यते। तत्त्यजैनं मिथ्याग्रहम्। उक्तं च—

एकं प्रसूयते माता द्वितीयं वाक्प्रसूयते।
वाग्जातमधिकं प्रोचुः सोदर्यादपि बान्धवात्॥ ६॥

अथ मकर्याह—त्वया कदाचिदपि मम वचनं नान्यथा कृतम्। तन्नूनं सा वानरी भविष्यति यतस्तस्या अनुरागतः सकलमपि दिनं तत्र गमयसि। तत् त्वं ज्ञातो मया सम्यक्। यतः—

साह्लादं वचनं प्रयच्छसि न मे नो वाञ्छितं किंचन
प्रायः प्रोच्छ्वसिषि द्रुतं हुतवहज्वालासमं रात्रिषु।
कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादराचुम्बसे
तत्ते धूर्त हृदि स्थिता प्रियतमा काचिन्ममैवापरा॥ ७॥

सोऽपि पत्न्याः पादोपसंग्रहं कृत्वाङ्कोपरि निधाय तस्याः कोपकोटिमापन्नायाः पत्न्याः सुदीनमुवाच—

गोष्ठी संलापः। गोष्ठी सभासंलापयोः स्त्रियाम्। एवं विधा प्रकारो येषां तानि। प्रीतिः पूर्वा यस्मिन्कर्मणि। मिथ्या असंभावी चासौ आग्रहश्च। एकं बान्धवमिति शेषः। वाचः संभाषणात् जातम्। सह उदरे जातः सोदर्यः। अन्यथाकृतम् लंघितमित्यर्थः। साह्लादमानन्देन। वाञ्छितं नो प्रयच्छसि। प्रोच्छ्वसिषि तद्विरहात्। शिथिलता अनौत्सुक्यम। इति यत्तत्सर्वं हे धूर्त काचिद् मम मत्तः अपरा प्रि० ते हृदि स्थिता एव इति हेतोः। पादोपसंग्रहं पादग्रहणं। निधाय तां पादौ वा। कोपकोटिं कोपकाष्ठां। पत्न्याः पत्नीमित्यर्थः।

---

१ पत्न्याः २ प्राप्नोति भवान्. ३ प्रयच्छति नित्यम्. ४ अहो भर्तः किंबहुना त०. ५ अपरं फलदाता। ततो. ६ एकस्थाने प्रसूते वागन्यस्मिञ्जननी नृणाम्। ७ प्रोक्तं. ८ बन्धुवत्.

मयि ते पादपतिते किंकरत्वमुपागते ।
त्वं प्राणवल्लभे कस्मात्कोपने कोपमेष्यसि ॥ ८ ॥

सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी तमुवाच—

सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथंचिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥ ९ ॥

अपरं सा यदि तव वल्लभा न भवति तत्किं मया भणितेऽपि तां न व्यापादयसि । अथ यदि स वानरस्तत्कस्तेन सह तव स्नेहः । तत्किं बहुना । यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतं विद्धि । एवं तस्यास्तन्निश्चयं ज्ञात्वा चिन्ताव्याकुलितहृदयः स प्रोवाच । अहो साध्विदमुच्यते—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥ १० ॥

तत्किं करोमि । कथं स मे वध्यो भविष्यति । इति विचिन्त्य वानरपार्श्वमगमत् । वानरोऽपि चिरादायान्तं तं सोद्वेगमवलोक्य प्रोवाच भो मित्र किमद्य चिरवेलया समायातोऽसि । कस्मात्साह्लादं नालपसि । न सुभाषितानि पठसि । स आह—मित्र अहं तव भ्रातृजायया निष्ठुरतरैर्वाक्यैरभिहितः—भोः कृतघ्न मा मे संमुखं मुखं दर्शय यतस्त्वं मित्रं नित्यमेवोपजीव्यागच्छसि । तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेणापि न करोषि । तत्ते प्रायश्चित्तमपि नास्ति । उक्तं च—

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ११ ॥

तत्त्वं मम देवरं गृहीत्वाद्य प्रत्युपकारार्थं गृहमागच्छ । नोचेत्त्वया सह

कोपमेष्यसि कोपस्त्वया त्याज्य इत्यर्थः । प्लुतं व्याप्तमाकुलमित्यर्थः । मुखं यस्याः । कृत्रिमेण न तु वास्तवेन । यथा मम । भावेनानुरागेण रम्या । इह तव मनसि । कृतं चरण०—मिथ्यापादपतनेनालमित्यर्थः । प्रायोपवेशनं मृत्युहेतोरनशनेनावस्थानम् । ग्रहः ग्रहणं यत्सकृद्गृह्णन्ति तत् सर्वथा न त्यजन्तीत्यर्थः । सोद्वेगं विषण्णं उद्वेगेन सहितं यथा तथेति वा । उपजीव्य-तेन दत्तं फलादि भुक्त्वेत्यर्थः । दर्शनमेव दर्शनमात्रं तेन । सुरां पिबतीति सुरापः तस्मिन् ।

---

१ प्रिये कामातुरः कोपं कान्ते कोन्योपनेष्यति. २ मर्कटः ३ महा ४ तत् तत्रोपरि प्रायोपवेशनं कृत्वा प्राणत्यागं करिष्यामि. ५ अथवा. ६ वेलायां, चिरवेलायां. ७ लापयसि. ८ तराभिर्गीर्भिः. ९ मा मे त्वं स्वमुखं. १० त्वं प्रतिदिनं मित्रमुपजीवसि. ११ शठे. १२ देवरं प्रत्यु० गृहमानय. १३ अथवा.

मे परलोके दर्शनम् । तदहं तयैवं प्रोक्तस्तव सकाशमागतः । तदद्य तया सह त्वदर्थे कलहायमानस्येयती वेला मे विलग्ना । तदागच्छ मे गृहम् । तव भ्रातृपत्नी रचितचतुष्का प्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धवन्दनमाला सोत्कण्ठा तिष्ठति । मर्कट आह—भो मित्र युक्तमभिहितं मद्भ्रातृपत्न्या । उक्तं च—

वर्जयेत्कौलिकाकारं मित्रं प्राज्ञतरो नरः ।
आत्मनः संमुखं नित्यं य आकर्षति लोलुपः ॥ १२ ॥

तथा च ।

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ १३ ॥

परं वयं वनचरा युष्मदीयं जलान्ते गृहम् । तत्कथं शक्यते तत्र गन्तुम् । तस्मात्तामपि मे भ्रातृपत्नीमत्रानय येन प्रणम्य तस्या आशीर्वादं गृह्णामि । स आह—भो मित्र अस्ति समुद्रान्ते सुरम्ये पुलिनप्रदेशेऽस्मद्गृहम् । तन्मम पृष्ठमारूढः सुखेनाकृतभयो गच्छ । सोऽपि तच्छ्रुत्वा सानन्दमाह—भद्र यद्येवं तत्किं विलम्ब्यते । त्वर्यताम् । एषोऽहं तव पृष्ठमारूढः । तथानुष्ठितेऽगाधजले गच्छन्तं मकरमालोक्य भयत्रस्तमना वानरः प्रोवाच—भ्रातः शनैः शनैर्गम्यताम् । जलकल्लोलैः प्लाव्यते मे शरीरम् । तदाकर्ण्य मकरश्चिन्तयामास—असावगाधं जलं प्राप्तो मे वशः संजातः । मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति । तस्मात्कथयाम्यस्य निजाभिप्रायं येनाभीष्टदेवतास्मरणं करोति । आह च—मित्र त्वं मया वधाय समानीतो भार्यावाक्येन विश्वास्य । तत्स्मर्यतामभीष्टदेवता । स आह—भ्रातः किं मया तस्यास्तवापि चापकृतं येन मे वधोपायश्चिन्तितः । मकर आह—भोः तस्यास्तवापि हृदयस्यामृतमयफलरसास्वादनामृष्टस्य भक्षणे दोहदः संजातः । तेनैतदनुष्ठितम् । प्रत्युत्पन्नमतिर्वानर आह—भद्र यद्येवं तत्किं

कलहायमानस्य कलहं कुर्वाणस्य । इदं परिमाणमस्या इयती । रचितानि विविधवर्णचूर्णेन निर्मितानि चतुष्काणि भूमिशोभार्थं चतुष्कोणाकृतयो यया । प्रगुणितानि उत्कृष्टानि । माणिक्यादीनि उचितानि आभरणानि यस्याः । कौलिकः कुविंदः । यः कौलिकः लोलुपः सन् इ० । यन्मित्रं स्वार्थपरं तन्मातिमांस्त्यजेदिति निष्कर्षः । पुलिनं जलनिर्गतः तटप्रदेशः । कल्लोलाः महातरंगाः । भार्यावाक्येन वाक्यानुरोधात् । आमृष्टस्य शोधितस्य । अमृतमयस्येत्यर्थः । दोहदोभिलाषः ।

---

१ कलहवतः, कलहायतः मम. २ माणिक्या,-द्युचितसत्कारा. ३ जलान्तरे. ४ कथमपि न शक्यते. ५ अगाधे जलधौ. ६ प्लावितं. ७ वाक्यात्. ८ दन वतः. ९ ततः प्रत्यु०; एतन्नास्ति क्वचित्.

त्वया मम तत्रैव न व्याहृतं येन स्वहृदयं जम्बूकोटरे सदैव मया सुगुप्तं कृतं तद्भ्रातृपत्न्या अर्पयामि । त्वयाहं शून्यहृदयोऽत्र कस्मादानीतः । तदाकर्ण्य मकरः सानन्दमाह—भद्र यद्येवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति । अहं त्वां तमेव जम्बूपादपं प्रापयामि । एवमुक्त्वा निवर्त्य जम्बूतलमगात् । वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूजस्तीरमासादितवान् । ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढश्चिन्तयामास—अहो लब्धास्तावत्प्राणाः । अथवा साध्विदमुच्यते—

न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १४ ॥

तन्ममैतदद्य पुनर्जन्मदिनमिव संजातम् । इति चिन्तयमानं मकर आह—भो मित्र अर्पय तद्धृदयं यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति । अथ विहस्य निर्भर्त्सयन्वानरस्तमाह—धिग्धिङ् मूर्ख विश्वासघातक किं कस्यचिद्धृदयद्वयं भवति । तदाशु गम्यताम् । जम्बूवृक्षस्याधस्तान्न भूयोऽपि त्वयात्रागन्तव्यम् । उक्तं च यतः—

सकृद्दुष्टं च यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १५ ॥

तच्छ्रुत्वा मकरः सविलक्षं चिन्तितवान्—अहो मयातिमूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः । तद्यद्यसौ पुनरपि कथंचिद्विश्वासं गच्छति तद्भूयोऽपि विश्वासयामि । आह च—मित्र हास्येन मया तेऽभिप्रायो लब्धः । तस्या न किंचित्तव हृदयेन प्रयोजनम् । तदागच्छ प्राघूर्णकन्यायेनास्मद्गृहम् । तव भ्रातृपत्नी सोत्कण्ठा वर्तते । वानर आह—भो दुष्ट गम्यताम् । अधुना नाहमागमिष्यामि । उक्तं च—

बुभुक्षितः किं न करोति पापं क्षीणा जना निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य न गङ्गदत्तः पुनरेति कूपम् ॥ १६ ॥

मकर आह—कथमेतत् । स आह—

व्याहृतमुक्तं । जल्पित०—जल्पिता विविधा देवताभ्यः विविधदेवताभ्यो वा उपचारपूजा येन । उपचारैः पूजा उपचाररूपा पूजा इति च उपचाराश्च पूजा चेति वा । संक्रमणमुत्प्लवनम् । विश्वसेत् विश्वस्यादित्येव साधु । निर्भर्त्सयन् परस्मैपदं चिन्त्यं । दुष्टं—भेदं प्रापितं । सविलक्षं विगतं लक्षं लज्जया यस्मिन् कर्मणि तद्यथा । हास्येन परिहासेन । प्राघूर्णकन्यायेन अतिथिर्यथा । बुभुक्षितः क्षुधितः । किं न करोति सर्वं पापं कुर्यादित्यर्थः । क्षीणा दरिद्रा नीचावस्थां गता वा ।

---

१ कथितं. २ टरान्तःस्थापितं सुस्वादं. ३ सानन्दः प्राह. ४ निवर्तते. ५ विश्वस्तात्. ६ तदन्यत्संततिदिनं. ७ चिन्तयानमनन्तरं. ८ र्त्सयमानः. ९ हृदयं द्वितीयं. १० प्राघुणिकः. ०स्मदावासम्.

कथा १।

अस्ति कस्मिंश्चित्कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म। स कदाचिद्दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत्कथं तेषां दायादानां मया प्रत्यपकारः कर्तव्यः। उक्तं च—

आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये॥ १७॥

एवं चिन्तयन्बिले प्रविशन्तं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत्—यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि। उक्तं च।

शत्रुभिर्योजयेच्छत्रुं बलिना बलवत्तरम्।
स्वकार्याय यतो न स्यात्काचित्पीडात्र तत्क्षये॥ १८॥

तथा च। शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा॥
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम्॥ १९॥

एवं स परिभाव्य बिलद्वारं गत्वा तमाहूतवान्—एह्येहि प्रियदर्शन एहि। तच्छ्रुत्वा सर्पश्चिन्तयामास य एष मामाह्वयति स स्वजातीयो न भवति यतो नैषा सर्पवाणी। अन्येन केनापि सह मम मर्त्यलोके संधानं नास्ति। तदत्रैव दुर्गे स्थितस्तावद्वेद्मि कोऽयं भविष्यति। उक्तं च—

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः॥ २०॥

कदाचित्कोऽपि मन्त्रवाद्यौषधचतुरो वा मामाहूय बन्धने क्षिपति। अथवा कश्चित्पुरुषो वैरमाश्रित्य कस्यचिद्भक्षणार्थे मामाह्वयति। आह च—भोः को भवान्। स आह—अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्र्यर्थमागतः। तच्छ्रुत्वा सर्प आह—भोः अश्रद्धेयमेतत् यत्तृणानां वह्निना सह संगमः। उक्तं च—

यो यस्य जायते वध्यः स स्वप्नेऽपि कथंचन।
न तत्समीपमभ्येति तत्किमेवं प्रजल्पसि॥ २१॥

गङ्गदत्त आह—भोः सत्यमेतत्। स्वभाववैरी त्वमस्माकम्। परं परपरिभवात्प्राप्तोऽहं ते सकाशम्। उक्तं च —

दायादैः बान्धवैः। अरघट्टः चक्रावयवसदृशैः काष्ठविशेषै रचितो जलोद्घाटनयन्त्रविशेषः। अपकृत्य अपकारं कृत्वा। यः शत्रुभिः कृते अपकारे प्रत्यपकारं करोति स एव नर इति भावः। शत्रुभिरिति–स्वकार्याय स्वहेतुसिद्धये शत्रुभिः शत्रुं योजयेत्। बलिना नरेण तदधिकबलं योजयेत्। यतः तत्क्षये तयोः शत्रुबलिनोः विनाशविषये क्षये जाते सति इति वा। सुखमेवार्थस्तस्मै। परिभाव्य विचार्य। परेभ्यः परिभवः अवमानना परपरिभवः तस्मात्।

---

१ पराक्रमः. २ मनुस्मृत्य कस्यचिद्भक्षयार्थं प्राह्वयति.

सर्वस्वनाशे संजाते प्राणानामपि संशये ।
अपि शत्रुं प्रणम्यापि रक्षेत्प्राणान् धनानि च ॥ २२ ॥

सर्प आह—कथय कस्मात्ते परिभवः । स आह—दायादेभ्यः । सोऽप्याह—क्व त आश्रयो वाप्यां कूपे तडागे ह्रदे वा । तत्कथय स्वाश्रयम् । तेनोक्तम्—पाषाणचयनिबद्धे कूपे । सर्प आह—अहो अपदा वयम् । तन्नास्ति तत्र मे प्रवेशः । प्रविष्टस्य च[2] स्थानं नास्ति यत्र स्थितस्तव दायादान्व्यापादयामि । तद्गम्यताम् । उक्तं च—

यच्छक्यं ग्रसितुं ग्रस्यं[3] ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदद्यं भूतिमिच्छता ॥ २३ ॥

गङ्गदत्त आह—भोः समागच्छ त्वम् । अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि । तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति । तत्र स्थितस्त्वं लीलया दायादान्व्यापादयिष्यसि । तच्छ्रुत्वा सर्पो व्यचिन्तयत्—अहं तावत्परिणतवयाः कदाचित्कथंचिन्मूषकमेकं प्राप्नोमि । तत्सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः । तद्गत्वा तान्मण्डूकान्भक्षयामि इति । अथवा साध्विदमुच्यते—

यो हि प्राणपरिक्षीणः सहायपरिवर्जितः[4] ।
स हि सर्वसुखोपायां वृत्तिमारचयेद्बुधः[5] ॥ २४ ॥

एवं विचिन्त्य तमाह—भो गङ्गदत्त यद्येवं तदग्रे भव । येन[6] तत्र गच्छावः । गङ्गदत्त आह—भोः प्रियदर्शन अहं त्वां सुखोपायेन तत्र नेष्यामि स्थानं च दर्शयिष्यामि । परं त्वयास्मत्परिजनो रक्षणीयः । केवलं यानहं दर्शयिष्यामि त्वया त एव भक्षणीया इति । सर्प आह—सांप्रतं त्वं मे मित्रं[7] जातः । तन्न भेतव्यम् । तव वचनेन भक्षणीयास्ते दायादाः । एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः । अथ कूपमासाद्यारघट्टघटिकामार्गेण सर्पस्तेनात्मना स्वालयं नीतः । ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः । ते च तेन शनैर्भक्षिताः । अथ मण्डूकाभावे सर्पेणाभिहितम्—भद्र निःशेषितास्ते रिपवः । तत्प्रयच्छा-

चयः समूहः । अपदा पादहीनाः । स्थानमनुकूल आश्रयः । ग्रस्यं भोज्यम् । परिणमेत् सुजीर्णं भवेत् । अद्यं भक्षणीयम् । कोटरं विवरम् । परिणतं वयो यस्य वृद्धः । प्राणपरिक्षीणः प्राणेन परिक्षीणः शक्तिहीनः । शक्तिः पराक्रमः प्राणः इत्यमरः । सर्वे सुखस्य सर्वसुखस्येति वा उपाया यस्याम् । जातमिति पाठस्त्वसाधुः । तव वचनेन निदर्शनानुरोधेन दायादान् भक्षयिष्यामीत्यर्थः ।

१ सर्वनाशे च. २ च तत्र. ३ सस्यं. ४ सहायैः. ५ आरभते, आवरयेत्. ६ येनागच्छामि. ७ मित्रत्वमुपागतः.

न्यन्मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः। गङ्गदत्त आह—भद्र कृतं त्वया मित्रकृत्यम्। तत्सांप्रतमनेनैव घटिकायन्त्रमार्गेण गम्यताम् इति। सर्प आह—भो गङ्गदत्त न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि। मदीयबिलदुर्गमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत्सर्वानपि भक्षयिष्यामि इति। तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्—अहो किमेतन्मयाकृतं सर्पमानयता। तद्यदि निषेधयिष्यामि तत्सर्वानपि भक्षयिष्यति। अथवा युक्तमुच्यते—

योऽमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः।
स करोति न संदेहः स्वयं हि विषभक्षणम्॥ २५॥

तत्प्रयच्छाम्यस्यैकं दिनं प्रति सुहृदम्। उक्तं च—

सर्वस्वहरणे युक्तं शत्रुं बुद्धियुता नराः।
तोषयन्त्यल्पदानेन वाडवं सागरो यथा॥ २६॥

तथा च।

यो दुर्बलो ह्यणवपि[१] याच्यमानो बलीयसा यच्छति नैव साम्ना।
प्रयच्छते[२] नैव च दर्श्यमानं खारीं स चूर्णस्य पुनर्ददाति॥ २७॥

तथा च।

सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुस्तरः[३]॥ २८॥
न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः।
एतदेव हि पाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम्॥ २९॥

एवं निश्चित्य नित्यमेकैकमादिशति। सोऽपि तं भक्षयित्वा तस्य परोक्षे अन्यानपि भक्षयति। अथवा साध्विदमुच्यते——

यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते।
एवं चलितवृत्तस्तु[४] वृत्तशेषं न रक्षति॥ ३०॥

वीर्येणाभ्यधिकम्। सर्वस्वेति—सर्वस्वहरणे युक्तमुद्युक्तं अल्पस्य दानेन। वाडवं वडवाग्निम्। यो दुर्बलः हीनबलः नरः अणु अल्पमपि याच्यमानः साम्ना सान्त्वोपायेन तन्न प्रयच्छति तथा च दर्श्यमानं किंचिद्वस्त्वपि न प्रयच्छति स पुनः बलात्त्कारितः चूर्णस्य खारीमपि ददाति। अल्पस्य स्थाने बहुव्ययं करोतीत्यर्थः। स्वल्पव्ययेन भूरि रक्षणं कर्तव्यमिति भावः। यथेति—यथा मलिनवस्त्रधारी नरः यत्र तत्र क्वापि। पङ्किलेपि स्थाने इत्यर्थः। उपविशति स्थानास्थानचिन्तां न करोति तथा कस्माच्चित् साध्वाचाराच्चलितो नरोन्यस्याचारस्योल्लंघने न विचारयति। सर्वत्र दुराचरणे प्रवर्तत इत्यर्थः।

---

१ अणूनपि. २ प्रणम्य तस्यैव स दर्पलक्ष्मीं देहस्य सर्वस्य पुनर्ददाति. ३ दुःसहः ४ वित्तस्तु वित्तशेषं, वृत्तिशेषं.

अथान्यदिने तेनापरान्मण्डूकान्भक्षयित्वा गङ्गदत्तसुतो यमुनादत्तो भक्षितः । तं भक्षितं दृष्ट्वा गङ्गदत्तस्तारस्वरेण धिग्धिक्प्रलापपरः कथंचिदपि न विरराम । ततः स्वपत्न्याभिहितः——

किं क्रन्दसि दुराक्रन्द स्वपक्षक्षयकारक ।
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति ॥ ३१ ॥

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणमस्य वधोपायश्च । अथ गच्छता कालेन सकलमपि कवलितं मण्डूककुलम् । केवलमेको गङ्गदत्तस्तिष्ठति । ततः प्रियदर्शनेन भणितम्—भो गङ्गदत्त बुभुक्षितोऽहम् । निःशेषिताः सर्वे मण्डूकाः । तदीयतां मे किंचिद्भोजनं यतोऽहं त्वयात्रानीतः । स आह——भो मित्र न त्वयात्र विषये मयावस्थितेन कापि चिन्ता कार्या । तद्यदि मां प्रेषयसि ततोऽन्यकूपस्थानपि मण्डूकान्विश्वास्यात्रानयामि । स आह——मम तावत्त्वमभक्ष्यो भ्रातृस्थाने । तद्यद्येवं करोषि तत्सांप्रतं पितृस्थाने भवसि । तदेवं क्रियताम् इति । सोऽपि तदाकर्ण्य अरघट्टघटिकामाश्रित्य विविधदेवतोपकल्पितपूजोपयाचितस्तस्मात्कूपाद्विनिष्क्रान्तः । प्रियदर्शनोऽपि तदाकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति । अथ चिरादनागते गङ्गदत्ते प्रियदर्शनोऽन्यकोटरनिवासिनीं गोधामुवाच—भद्रे क्रियतां स्तोकं साहाय्यम् । यतश्चिरपरिचितस्ते गङ्गदत्तः । तद्गत्वा तत्सकाशं कुत्रचिज्जलाशयेऽन्विष्य मम संदेशं कथय । यदागम्यतामेकाकिनापि भवता द्रुततरं यद्यन्ये मण्डूका नागच्छन्ति । अहं त्वया विना नात्र वस्तुं शक्नोमि । तथा यद्यहं तव विरुद्धमाचरामि तत्सुकृतमन्तरे मया विधृतम् । गोधापि तद्वचनाद्गङ्गदत्तं द्रुततरमन्विष्याह भद्र गङ्गदत्त स तव सुहृत्प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति । तच्छीघ्रमागम्यताम् इति । अपरं च तेन तव विरूपकरणे सुकृतमन्तरे धृतम् । तन्निःशङ्केन मनसागम्यताम् । तदाकर्ण्य गङ्गदत्त आह——

बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य न गङ्गदत्तः पुनरेति कूपम् ॥ ३२ ॥

तारस्वरेण उच्चैः । दुराक्रन्द दुष्टः आकिंचित्करत्वादतीतकालत्वाद्वा आक्रन्दो यस्य तत्सं० । कवलितं भक्षितम् । मयावस्थितेन मयि स्थिते । देवताभ्य उपकल्पिता पूजा उपयाचितानि च येन । उपयाचितं स्वमनोरथसिद्धये देवतायै दातुमिष्टं वस्तु । गोधा निहाका जलजन्तुभेदः । स्तोकमल्पम् । सुकृतमन्तरे धृतं यदि तव विरुद्धमाचरेयं तर्हि मे सुकृतनाशः स्यादतस्तन्नाचरेयामित्यर्थः ।

---

१ पृथु. २ मत्वा. ३ धिङ्मां धिङ्मामित्येवं विललाप. ४ त्वत्त्राणं कः करिष्यति. ५ पायो वा. ६ मयि विद्यमाने. ७ त्वया सह परिचितमास्ते । तद्गत्वा मण्डूकमान्विष्य क्वचिज्जलाशये गंगदत्ताय मम. ८ येन. ९ समाग०.

एवमुक्त्वा स तां विसर्जयामास। तद्भो दुष्टजलचर अहमपि गङ्गदत्त इव त्वद्गृहं न कथंचिदपि यास्यामि। तच्छ्रुत्वा मकर आह——भो मित्र नैतद्युज्यते। सर्वथैव मे कृतघ्नतादोषमपनय मद्गृहागमनेन। अथवात्राहमनशनात्प्राणत्यागं तवोपरि करिष्यामि। वानर आह मूढ किमहं लम्बकर्णो गर्दभो यो दृष्टापायोऽपि स्वयमेव तत्र गत्वा मृतः।

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम्।
अकर्णहृदयो मूर्खस्तेन मृत्युवशंगतः॥ ३३॥

मकर आह—भद्र स को लम्बकर्णः। कथं दृष्टापायोऽपि मृतः। तन्मे निवेद्यताम्। वानर आह—

कथा २।

अस्ति कस्मिंश्चिद्वनोद्देशे करालकेसरो नाम सिंहः प्रतिवसति स्म। तस्य च धूसरको नाम शृगालः सदैवानुयायी परिचारकोऽस्ति। अथ कदाचित्तस्य हस्तिना सह युद्ध्यमानस्य शरीरे गुरुतराः प्रहाराः संजाता यैः पदमेकमपि चलितुं न शक्नोति। तस्याचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः। अन्यस्मिन्नहनि तमवोचत्—स्वामिन् बुभुक्षया पीडितोऽहम्। पदात्पदमपि चलितुं न शक्नोमि। तत्कथं ते शुश्रूषां करोमि। सिंह आह भोः गच्छान्वेषय किंचित्सत्त्वं येनेमामवस्थां गतोऽपि व्यापादयामि। तदाकर्ण्य शृगालोऽन्वेषयन्कंचित्समीपवर्तिनं ग्राममासादितवान्। तत्र लम्बकर्णो नाम गर्दभस्तडागोपान्ते प्रविरलदूर्वाङ्कुरान्कृच्छ्रादास्वादयन्दृष्टः। ततश्च समीपीभूय तेनाभिहितः—माम नमस्कारोऽयं मदीयः संभाव्यताम्। चिराद्दृष्टोऽसि। तत्कथय किमेवं दुर्बलतां गतः। स आह—भो भगिनीसुत किं कथयामि। रजकोऽतिनिर्दयोऽतिभारेण मां पीडयति। घासमुष्टिमपि न प्रयच्छति। केवलं दूर्वाङ्कुरान्धूलिमिश्रितान्भक्षयामि। तत्कुतो मे शरीरे पुष्टिः। शृगाल आह—माम यद्येवं तदस्ति मरकतसदृशशष्पप्रायो नदीसनाथो रमणीयतरः प्रदेशः। तत्रागत्य मया सह सुभाषितगोष्ठीसुखमनुभवंस्तिष्ठ। लम्बकर्ण आह—भो

अकर्णहृदयः अविद्यमानं कर्णौ च हृदयं च कर्णहृदयं यस्य। श्रवणमननरहितश्च। उद्देशः प्रदेशः। क्षुधा बुभुक्षया क्षामः कण्ठः यस्य। शुश्रुषा सेवा। कृच्छ्रात् कष्टेन। रजको निर्णेजकः। घासः तृणम्। मरकतसदृशानि मरकतवद् हरितानि शष्पाणि बालतृणानि प्रचुराणि यस्मिन् स मरकतप्रायः। नदीसनाथो नद्या युक्तः।

---

१ इव दृष्टापायोपि. २ मूर्खो दृ०...गत्वात्मानं व्यापादयामि. ३ मूर्खो यो गत्वा पुनरागतः. ४ ०पवर्तिना भूत्वा. ५ दुर्बलः. ६ पुत्र. ७ दमयति. ८ मातुल ...

भगिनीसुत युक्तमुक्तं भवता । परं वयं ग्राम्याः पशवोऽरण्यचारिणां वध्यास्तत्किं तेन भव्यप्रदेशेन । शृगाल आह—माम मैवं वद । मद्भुजपरिरक्षितः स देशः । तत्रास्ति कस्यचित्परस्य तत्र प्रवेशः । परमनेनैव दोषेण रजककदर्थितास्तत्र तिस्रो रासभ्योऽनाथाः सन्ति । ताश्च पुष्टिमापन्ना यौवनोत्कटा इदं मामूचुः—यदि त्वमस्माकं सत्यो मातुलस्तदा किंचिद्ग्रामान्तरं गत्वास्मद्योग्यं कंचित्पतिमानय । तदर्थे त्वामहं तत्र नयामि । अथ शृगालवचनानि श्रुत्वा कामपीडिताङ्गस्तमवोचत्—भद्र यद्येवं तदग्रे भव येनागच्छामि । अथवा साध्विदमुच्यते—

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ।
यस्याः सङ्गेन जीव्येत म्रियेत च वियोगतः ॥ ३४ ॥

तथा च । यासां नाम्नापि कामः स्यात्संगमं दर्शनं विना ।
तासां दृक्संगमं प्राप्य यन्न द्रवति कौतुकम् ॥ ३५ ॥

तथानुष्ठिते शृगालेन सह सिंहान्तिकमागतः । सिंहोऽपि व्यथाकुलितस्तं दृष्ट्वा यावत्समुत्तिष्ठति तावद्रासभः पलायितुमारब्धवान् । अथ तस्य पलायमानस्य सिंहेन तलप्रहारो दत्तः । स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः । अत्रान्तरे शृगालः कोपाविष्टस्तमुवाच भोः किमेवंविधः प्रहारस्ते यद्गर्दभोऽपि तव पुरतो बलाद्गच्छति । तत्कथं गजेन सह युद्धं करिष्यसि । तद्दृष्टं ते बलम् । अथ विलक्षस्मितं सिंह आह—भोः किमहं करोमि । मया न क्रमः सज्जीकृत आसीत् । अन्यथा गजोऽपि मत्क्रमाक्रान्तो न गच्छति । शृगाल आह—अद्याप्येकवारं तवान्तिके तमानेष्यामि । परं त्वया सज्जीकृतक्रमेण स्थातव्यम् । सिंह आह—भद्र यो मां प्रत्यक्षतया दृष्ट्वा गतः स पुनः कथमत्रागमिष्यति । तदन्यत्किमपि सत्त्वमन्विष्यताम् । शृगाल आह—किं तवानेन व्यापा-

---

ग्राम्याः ग्रामे भवाः । भव्यः सुन्दरः । तत्तस्मात्कारणात् । परस्य शत्रोः । अनेनैव दोषेण पर्याप्तभोजनाभावेन । रजकेन कदर्थिताः पीडिताः । यौवनेन उत्कटा मत्ता यौवनोत्कटाः । मत्ते शौण्डोत्कटक्षीवा इत्यमरः । कामेन पीडितानि अङ्गानि यस्य । नामृतमिति—नितम्बिनीनां प्रशस्तः नितम्ब विद्यते आसां तासां सुन्दरीणां सङ्ग एवामृतं वियोगो विषमित्यर्थः । कामः रागोत्पत्तिः । तासां दृक्संगमं प्राप्य नरः न द्रवति इति यत् तत् कौतुकमाश्चर्यकरमित्यन्वयः । सर्वोऽपि तद्वशोभवतीति पिण्डितोर्थः । तलप्रहारश्चपेटाघातः। मन्दभाग्यस्य दैवहीनस्य व्यवसाय उद्यमः। एवं विधा प्रकारो यस्य । विलक्षस्मितं यस्मिन् कर्मणि तद्यथा तथा । क्रम आक्रमणाटोपः ।

---

१ भुजपञ्जर. २ तस्योपरि पपात । गर्धभोपि तं वज्रपातमिव मन्यमानः किमिदमिति विचिन्तयन्नक्षततनुरेव दैवात्कथमपि तस्मादपगतः । ३ प्रत्यक्षं. ४ भवतोन्यया चिन्तया । अत्रार्थेहमेव जागरूकस्तिष्ठामि ।

रेण। त्वं केवलं सज्जितक्रमस्तिष्ठ। तथानुष्ठिते शृगालोऽपि यावद्रासभमार्गेण गच्छति तावत्तत्रैव स्थाने चरन्दृष्टः। अथ शृगालं दृष्ट्वा रासभः प्राह—भो भगिनीसुत शोभनस्थाने त्वयाहं नीतः। द्राङ् मृत्युवशं गतः। तत्कथय किं तत्सत्त्वं यस्यातिरौद्रवज्रसदृशकरप्रहारादहं मुक्तः। तच्छ्रुत्वा प्रहसञ्शृगाल आह—भद्र रासभी त्वामायान्तं दृष्ट्वा सानुरागालिङ्गितुं समुत्थिता। त्वं कातरत्वान्नष्टः। सा पुनर्न शक्ता त्वां विना स्थातुम्। तया तु नश्यतस्तेऽवलम्बनार्थं हस्तः क्षिप्तो नान्यकारणेन। तदागच्छ। सा त्वत्कृते प्रायोपवेशनोपविष्टा तिष्ठति। एतद्वदति यल्लम्बकर्णो यदि मे भर्ता न भवति तदहमग्नौ जले वा प्रविशामि विषं वा भक्षयामि। पुनस्तस्य वियोगं सोढुं न शक्नोमि। तत्प्रसादं कृत्वा तत्रागम्यतामिति। नो चेत्तव स्त्रीहत्या भविष्यति। अपरंच भगवान्कामः कोपं तवोपरि करिष्यति। उक्तं च—

स्त्रीमुद्रां झषकेतनस्य जयिनीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे॥ ३६॥

अथासौ तद्वचनं श्रद्धेयतया श्रुत्वा भूयोऽपि तेन सह प्रस्थितः। अथवा साध्विदमुच्यते—

जानन्नपि नरो दैवात्प्रकरोति विगर्हितम्।
कर्म किं कस्यचिल्लोके गर्हितं रोचते कथम्॥ ३७॥

द्राक् द्रुतं। अतिरौद्रः वज्रेण वज्रप्रहारेण सदृशः। कोपेनाविष्टः क्रोधवशः। एवंविधः करप्रहारः यस्य। सानुरागा कामपरवशा। कातरत्वाद्भीरुस्वभावत्वात्। नश्यतः पलायमानस्य। अवलम्बनार्थं ग्रहणार्थं। स्त्रीमुद्रेति—स्त्रीरूपा मुद्रा स्त्रीमुद्रा। झषः केतनं यस्य स झषकेतनः कामः। सर्वा चासौ अर्थसंपत्तां करोतीति। ये कुधियः कुत्सितमतयो विवेकशून्या इत्यर्थः। पुरुषाः झषकेतनस्य सर्वार्थसंपत्करीं स्त्रीमुद्रां प्रविहाय परित्यज्य मिथ्या वास्तवं स्त्रीसंगरूपं फलं विहायान्यन्नीरसं किंचिदन्विष्यन्तीति तथोक्ताः। ते तेनैव कामेनातिनिर्दयं प्रहृत्य केचिन्नग्नीकृता मुण्डिता वा जैनभिक्षुकाः क्षपणका वा कृताः। अपरे रक्तवस्त्रधारिणः। जटाधारिणः कपालधारिणश्च कृताः। जानन्निति—नरो ज्ञानवानपि विगर्हितं निन्दितं यत् कर्म करोति तद्दैवात् तथा भवितव्यतया एव करोति। अन्यथा एवं न चेत् लोके कस्यचित् गर्हितं कर्म कथं रोचते रोचेत। न कस्यापीत्यर्थः।

---

१ भागिनेय अभव्यस्थाने त्वयाहं नीतो यद्दैवान्मृत्युवशं न गतः। २ ०रागम्. ३ ०न उप., कृतमतिः. ४ मकरध्वजस्य. ५ महतीं. ६ कर्मैचिन्कर्म किं...कृतम्.

अत्रान्तरे सजितक्रमेण सिंहेन स कम्बुकर्णो व्यापादितः । ततस्तं हत्वा शृगालं रक्षपालं निरूप्य स्वयं स्नानार्थं नद्यां गतः । शृगालेनापि लौल्यौत्सुक्यात्तस्य कर्णहृदयं भक्षितम् । अत्रान्तरे सिंहो यावत्स्नात्वा कृतदेवार्चनः प्रतर्पितपितृगणः समायाति तावत्कर्णहृदयरहितो रासभस्तिष्ठति । तं दृष्ट्वा कोपपरीतात्मा सिंहः शृगालमाह आः पाप किमिदमनुचितं कर्म समाचरितं यत्कर्णहृदयभक्षणेनायमुच्छिष्टतां नीतः । शृगालः सविनयमाह स्वामिन् मा मैवं वद । यत्कर्णहृदयरहितोऽयं रासभ आसीत् तेनेहागत्य त्वामवलोक्य भूयोऽप्यागतः । अथ तद्वचनं श्रद्धेयं मत्वा सिंहस्तेनैव सह संविभज्य निःशङ्कितमनास्तं भक्षितवान् । अतोहं ब्रवीमि । आगतश्च गतश्चैव इति । तन्मूर्ख कपटं कृतं त्वया । परं युधिष्ठिरेणेव सत्यवचनेन विनाशितम् । अथवा साध्विदमुच्यते—

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते स मन्दधीः ।
स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः ॥ ३८ ॥

मकर आह । कथमेतत् । स आह ।

कथा ३ ।

कस्मिंश्चिदधिष्ठाने कुम्भकारः प्रतिवसति स्म । स कदाचित्प्रमदोर्धभग्नकर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन्पतितः । ततः कर्परकोट्या पाटितललाटो रुधिरप्लावितततनुः कृच्छ्रादुत्थाय स्वाश्रयं गतः । ततश्चापथ्यसेवनात्स प्रहारस्तस्य करालतां गतः कृच्छ्रेण नीरोगतां नीतः । अथ कदाचिद्दुर्भिक्षपीडिते देशे स कुम्भकारः क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव । सोपि राजा तस्य ललाटे विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास । यद्वीरः पुरुषः कश्चिदयम् । नूनं तेन ललाटपट्टे संमुखप्रहारः । अतस्तं संमानादिभिः स-

---

रक्षपालं रक्षकम् । लौल्यात् यदौत्सुक्यं लालसा तस्मात् । कोपेन परीतः व्याप्तः आत्मा यस्य । श्रद्धेयं विश्वासार्हम् । संविभज्य विभागं कृत्वा । प्रमदः प्रकृष्टो मदो मद्यजनितो यस्य । अर्धो भग्नो यः कर्परस्तस्य तीक्ष्णं च तदग्रं च तस्य । करालतां गतो रूढमांसो जातः । विकरालं भीषणं । संमुखप्र०—शत्रोः संमुखे युध्यमानस्य प्रहारो लग्नः ।

---

१ रक्षकं. २ गते सिंहे. ३ कृतयथोचितविधिः कृत०. ४ यदस्य कर्णसहितं हृदयं भक्षितं. ५ श्रुत्वा. ६ सु. ७ प्रमत्तः, प्रमादात्.

वेषां राजपुत्राणां सकाशाद्विशेषप्रसादेन पश्यति । तेपि राजपुत्रास्तस्य तं प्रसादातिरेकं पश्यन्तः परमेर्ष्याधर्मं वहन्तो राजभयान्न किंचिदूचुः । अथान्यस्मिन्नहनि तस्य भूपतेर्वीरसंभावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु संनह्यमानेषु वाजिषु योधेषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुलालः प्रस्तावानुगतं पृष्टो निर्जने । भो राजपुत्र कस्मिन्संग्रामे प्रहारोयं ते ललाटे लग्नः । स आह—देव नायं शस्त्रप्रहारः । युधिष्ठिराभिधः कुलालोहं प्रकृत्या । मद्गेहेनेककर्पराण्यासन् । अथ कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन्कर्परोपरि पतितः । तस्य प्रहारविकारोयं मे ललाट एवं विकरालतां गतः । तदाकर्ण्य राजा सव्रीडमाह—अहो वञ्चितोहं राजपुत्रानुकारिणानेन कुलालेन । तद्दीयतां द्रागेतस्य चन्द्रार्धः । तथानुष्ठिते कुम्भकार आह—मा मैवं कुरु । पश्य मे रणे हस्तलाघवम् । राजा प्राह । भोः सर्वगुणसंपन्नो भवान् । तथापि गम्यताम् । उक्तं च—

शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक ।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ३९ ॥

कुलाल आह । कथमेतत् । राजा कथयति—

कथा ४ ।

कस्मिंश्चिद्वनोद्देशे सिंहदंपती प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत् । सिंहोपि नित्यमेव मृगान्व्यापाद्य सिंह्यै ददाति । अथ कदाचित्तेन किमपि नासादितम् । वने भ्रमतोपि तस्य रविरस्तंगतः । अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः । स च बालकोयमिति मत्वा यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमपि समर्पितवान् । ततः सिंह्याभिहितम् । भोः कान्त आनीतं किंचिदस्माकं भोजनं त्वया । सिंह आह

अन्यस्मिन्नहनि एकदा । विग्रहे युद्धे समुपस्थिते इत्यन्वयः । वीराणां संभावना दानमानादिना गौरवं । संनह्यमानेषु कंकटाद्याच्छादनेन युद्धाय सज्जीक्रियमाणेषु । प्रकृष्टा गुणा वीर्यादयो येषां तथा क्रियमाणेषु । दीयतां चन्द्रार्धः अर्धचन्द्रदानेन निष्कास्यताम् । शूरश्चेति एवं सत्यपि यस्मिन्कुले त्वमुत्पन्नः तस्मिन् न कस्यापि तत्कुलोत्पन्नस्य गजहननसामर्थ्यमित्यर्थः ।

---

१ किं ते नाम का च जातिः । कस्मि०. २ जात्या. ३ अनेककर्परसंकुले प्रांगणप्रदेशे मद्यपानविकलः कर्परोपरि. ४ निधिः. ५ शूरश्च ०द्यश्च. ६ मिथुनं वसति. ७ अथान्यस्मिन्नहनि. ८ कृतानुकम्पेन दंष्ट्रामध्ये विधृत्य यत्नेन जीवन्नानीय सिंह्याः समर्पितः । इ. पा.

प्रिये मयाद्यैनं शृगालशिशुं परित्यज्य न किंचित्सत्त्वमासादितम्। स च मया बालोयमिति मत्वा न व्यापादितः। उक्तं च—

स्त्रीविप्रलिङ्गिबालेषु प्रहर्तव्यं न कर्हिचित्।
प्राणत्यागेपि संजाते विश्वस्तानां विशेषतः॥ ४०॥

इदानीत्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेन्यदुपार्जयिष्यामि। साह— भोः कान्त त्वया बालकोयमिति मत्वा न व्यापादितः। तदहं कथं स्वोदरार्थे विनाशयामि। उक्तं च—

अकृत्यं नैव कर्तव्यं प्राणत्यागेपि संस्थिते।
न च कृत्यं परित्याज्यं एष धर्मः सनातनः॥ ४१॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यति। इत्युक्त्वा तमपि स्वस्तनक्षीरेण पुष्टिमनयत्। एवं ते त्रयोपि शिशवः परस्परमज्ञातजातिविशेषा एकत्र विहारिणो बाल्यमतिवाहयन्ति। अथ कदाचित्तत्र वने भ्राम्यन्वनगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्तावत्तेन शृगालसुतेनाभिहितम्। अहो गजोयं युष्मत्कुलशत्रुः। तन्न गन्तव्यमेतस्याभिमुखम्। एवमुक्त्वा गृहं प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ। अथवा साध्विदमुच्यते—

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात्॥ ४२॥
अत एव हि वाञ्छन्ति भूपा योधान्महाबलान्।
शूरान्धीरान्कृतोत्साहान्वर्जयन्ति च कातरान्॥ ४३॥

अथ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुर्यथा गजं दृष्ट्वा दूरतोपि नष्टः। सोपि तदाकर्ण्य कोपाविष्टः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भ्रुकुटिं कृत्वा तौ निर्भर्त्सयमानः परुषतरवचनान्युवाच। ततः सिंह्यैकान्ते नीत्वा प्रबोधितोसौ-वत्स मैवं कदाचिज्जल्प भवदीयलघुभ्रातरावेतौ। अथासौ प्रभूतकोपाविष्टस्तामुवाच किमहमेताभ्यां शौर्येण रूपेण विद्याभ्यासेन कौशलेन वा हीनो येन मामुपह-

स्त्रीति— प्राणत्यागे संजात उपस्थितेपि। स्त्रियश्च विप्राश्च लिङ्गिनः परिव्राजकादयः बालाश्च तेषु। तं प्रति तमाक्रमितुमित्यर्थः। भङ्गात्तेजोहान्या। रणं प्रति सैन्यं सोत्साहं जायते। एकस्मिन्नपि भग्ने भङ्गमुत्साहभङ्गम्। धीरान् निश्चितमतीन्। नष्टः प्रद्रुतः। अधरः पल्लव इव अध०, प्रस्फुरितोधरपल्लवो यस्य। तिस्रः शिखा यस्याः ताम्। अतिवक्रामित्यर्थः।

१ विना. २ अयमपि स्वजातीयो बालश्चे०. ३ दितो विशेषास्वजातीयश्च। ४ प्राणात्यये०. ५ कृत्यं स्यात्. ६ विमुच्येत. ७ दृष्टः. ८ जेष्ठत्रासात्. ९ वीरान्. १० विद्याभ्यासको.

सुतः । तन्मयावश्यमेतौ व्यापादनीयौ । तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह—

> शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक ।
> यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ४४ ॥

तत्सम्यक् शृणु वत्स त्वं शृगालीसुतः कृपया मया स्वकीयक्षीरपानेन[1] पुष्टिं नीतः । तद्यावन्नैतौ त्वां शृगालं जानीतस्तावत् द्रुतं गत्वा स्वजाति[2]-मध्ये भव नो चेदाभ्यां हतो मृत्यु[3]पथं समेष्यसि । सोपि तद्वचनं श्रुत्वा भयव्याकुलमनाः क्षणात्[4]प्रनष्टः । तस्मात्त्वमपि यावदेते राजपुत्रास्त्वां कुलालं न जानन्ति तावद् द्रुततरमपसर । नो चेदेतेषां सकाशाद्विडम्बनां प्राप्स्यसि[5] । कुलालोपि तदाकर्ण्य सत्वरं[6] प्रनष्टः—

अतोहं ब्रवीमि स्वार्थमुत्सृज्य यो दम्भी इति । तद्भो[7] दुष्ट मकर त्वमपि कुलालवत्स्ववचनेन प्रकटीकृतः । अथवा साध्विदमुच्यते ।

> आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।
> बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ ४५ ॥

उक्तं च—

> सुगुप्तं रक्ष्यमाणोपि दर्शयन्दारुणं वपुः ।
> व्याघ्रचर्मप्रतिच्छन्नो वाक्कृते रासभो हतः ॥ ४६ ॥

मकर आह—कथमेतत् । स आह—

कथा ५ ।

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म । तस्यैको रासभोस्ति[9] । सोपि घासाभावादतिदुर्बलतां गतः । अथ तेन रजकेनाटव्यां[10] भ्रमता व्याघ्रचर्म प्राप्तम् । ततश्चाचिन्तयत् । अहो शोभनमापतितम् । अनेन चर्मणा परिच्छाद्य[11] रासभं रात्रौ यवक्षेत्रेषू[12]त्सृ[13]जामि येन व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रान्न निष्कासयन्ति । तथानुष्ठिते रासभो रात्रौ यथेच्छं यवभक्षणं करोति । प्रत्यूषे[14] भूयोपि रजकः स्वाश्रयं

व्याघ्रस्य चर्म व्या० तेन प्रतिच्छन्न आच्छादितः । वाक्कृते वाग्हेतोः । घासो यवसं गवाद्यदनीयं तृणम् ।

---

१ स्वस्तनक्षीरेण. २ स्वजातीयानां मध्ये ३ मृत्युमेष्य०. ४ शनैः शनैरपसृत्य स्वजात्या मिलितः. ५ प्राप्य मरिष्यसि. ६ द्रुततरं. ७ युधिष्ठिर इव सत्यवचनात्त्वं तामापदमापन्नः इ. पा. ८ ततो भद्र आगतेन त्वया मां प्रति वधोपायप्रयासः प्रारब्धः परं स्ववाग्दोषेणैव प्रकटीभूतः । ९ मदोद्धतो नाम च गर्दभोस्ति. १० क्वापि. ११ एतच्चर्म परिधाप्य. १२ यावत्; कणिशशालिषु. १३ उत्स्रक्ष्यामि...०सयिष्यन्ति. १४ रात्रिशेषे.

नयति । एवं गच्छता कालेन स रासभः पीवरतनुर्जातः । कृच्छ्राद्बन्धनमपि नीयते । अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दं शृण्वंस्तारस्वरेण शब्दायितुमारब्धः । अथ ते क्षेत्रपाला रासभोयं व्याघ्रचर्मप्रतिच्छन्न इति मत्वा लकुटपाषाणशरप्रहारैस्तं व्यापादितवन्तः । अतोहं ब्रवीमि । सुगुप्तं रक्ष्यमाणोपि इति । तत्किं श्यामलकवदत्यपमानसहनादर्धचन्द्रदानेन यास्यसि । मकर आह—कथमेतत् । स प्राह—

कथा ६ ।

अस्त्यत्र धरापीठे विकण्टकं नाम पुरम् । तत्र महाधन ईश्वरो नाम भाण्डपतिः । तस्य चत्वारो जामातृका अवन्तीपीठात्प्राघूर्णका विकण्टकपुरे समायाताः । ते च तेन महता गौरवेणाभ्यर्चिता भोजनाच्छादनादिभिः । एवं तेषां तत्र वसतां मासषट्कं संजातम् । तत ईश्वरेण स्वभार्योक्ता । यदेते जामातरः परमगौरवेणावर्जिताः स्वानि गृहाणि न गच्छन्ति । तत्किं कथ्यते । विनापमानं न यास्यन्ति । तदद्य भोजनवेलायां पादप्रक्षालनार्थं जलं न देयं येनापमानं ज्ञात्वा परित्यज्य गच्छन्तीति । तथानुष्ठिते गर्गः पादप्रक्षालनापमानात्सोमो लघ्वासनदानाद्दत्तः कदशनतो यातः । एवं ते त्रयोपि परित्यज्य गताः । चतुर्थः श्यामलको यावन्न याति तावदर्धचन्द्रप्रदानेन निष्कासितः । अतोहं ब्रवीमि ।

गर्गो हि पादशौचाल्लघ्वासनदानतो गतः सोमः ।
दत्तः कदशनभोज्याच्छ्यामलकश्चार्धचन्द्रेण ॥ ४७ ॥ इति ।

तत्किमहं रथकारवन्मूर्खो यतः स्वयमपि दृष्ट्वा ते विकारं पश्चाद्विश्वसिमि । उक्तं च—

प्रत्यक्षेपि कृते पापे मूर्खः साम्ना प्रशाम्यति ।
रथकारः स्वकां भार्यां सजारां शिरसावहत् ॥ ४८ ॥

मकर आह । कथमेतत् । स आह—

कथा ७ ।

कस्मिंश्चिदधिष्ठाने कश्चिद्रथकारः प्रतिवसति स्म । तस्य भार्या पुंश्चली

मदोद्धतो यौवनमदोत्कटः । अवन्तीपीठात् पीठं निवासस्थानं । भोजनं चाच्छादनं च भो० नं तदादि यस्य तेन । आवर्जिताः प्रवणीकृताः । गर्गः एतन्नामकः । कदशनतः कुत्सितमशनं क० तद्दानात् । पुंसः स्वपुरुषात् चलतीति पुंश्चली असती ।

---

१ अशृणोत् । तच्छ्रवणमात्रेणैव स्वयं. २ अस्ति क० ने वीरधरो नाम. ३ भार्या कामदमिनी । सा च पुं०.

जनापवादसंयुक्ता। सोपि तस्याः परीक्षार्थं व्यचिन्तयत्। कथं मयास्याः परीक्षणं कार्यम्। न चैतद्युज्यते कर्तुम्। यतः।

नदीनां च कुलानां च मुनीनां च महात्मनाम्।
परीक्षा न प्रकर्तव्या स्त्रीणां दुश्चरितस्य च॥ ४९॥
वसोर्वीर्योत्पन्नामभजत मुनिर्मत्स्यतनयां
तथा जातो व्यासः शतगुणनिवासः किमपरम्।
स्वयं वेदान्व्यस्यन्छमितकुरुवंशप्रसविता
स एवाभूच्छ्रीमानहह विषमाः कर्मगतयः॥ ५०॥

कुलानामिति पाण्डवानामपि महात्मनां नोत्पत्तिरधिगन्तव्या यतः क्षेत्रजा इति। स्त्रीदुश्चरितं संधुक्ष्यमाणमनेकदोषान्प्रकटयति स्त्रीणामिति। तथा च।

यदि स्यात्पावकः शीतः प्रोष्णो वा शशलाञ्छनः।
स्त्रीणां तदा सतीत्वं स्याद्यदि स्याद्दुर्जनो हितः॥ ५१॥

तथापि शुद्धामशुद्धां वापि जानामि लोकवचनात्। उक्तं च—

यन्न वेदेषु शास्त्रेषु न दृष्टं न च संश्रुतम्।
तत्सर्वं वेत्ति लोकोयं यत्स्याद्ब्रह्माण्डमध्यगम्॥ ५२॥

एवं संप्रधार्य तामवोचत्। प्रिये अहं प्रातर्ग्रामान्तरं यास्यामि। तत्र दिनानि कतिचिल्लगिष्यन्ति। तत्त्वया किंचित्पाथेयं मम योग्यं कार्यम्। सापि तदाकर्ण्य हर्षितचित्तौत्सुक्येन सर्वकार्याणि संत्यज्य सिद्धमन्नं घृतशर्कराप्रायमकरोत्। अथवा साध्विदमुच्यते—

दुर्दिवसे घनतिमिरे दुःसंचारासु नगरवीथीषु।
पत्यौ विदेशयाते परमसुखं जघनचपलायाः॥ ५३॥

अथासौ प्रत्यूष उत्थाय स्वगृहान्निर्गतः। सापि तं प्रस्थितं विज्ञाय प्रहसितवदनाङ्गसंस्कारं कुर्वाणा कथंचित्तं दिवसमत्यवाहयत्। ततश्च पूर्वपरिचितं विटगृहं गत्वा तमभ्यर्थ्योक्तवती। यद्ग्रामान्तरं गतः स दुरात्मा मे पतिः। तदद्य त्वयास्मद्गृहे प्रसुप्ते जने समागन्तव्यम्। तथानु-

मुनिः पराशरः। मत्स्यतनया सत्यवती। शतं गुणाः तेषां निवासः बहुगुणाश्रय इत्यर्थः। शमित उच्छिन्नो यः कुरुवंशस्तस्य प्रसविता। स एव तथोत्पन्नोपि। अधिगन्तव्या परीक्ष्योपलब्धव्या। क्षेत्रजाः न तु औरसाः। मृतस्य क्षेत्रे भार्यायां गुरुनियुक्तायां नियोगधर्मेण जातः पुत्रः क्षेत्रजः। पाथेयं पथि हितं। दुर्दिवसे घनच्छन्ने दिने। जघनचपला पुंश्चली।

१ अथ. २ जानामि चैनां लोकवचनादसतीम्। ३ यच्च. ४ प्रभातेहं ५ विधेयं. ६ तद्वचनं श्रुत्वा. ७ वर्षति जलदे महाटवीप्रभृतौ। पत्युर्विदेशगमने. ८ परिचितं कांचिद्विटगृहं गत्वाभ्यर्थ्योक्त०.

ष्ठिते स रथकारोऽप्यरण्ये दिनमतिवाह्य प्रदोषे स्वगृहमपरद्वारेण प्रविष्टः शय्या[1]तले निभृतो भूत्वा स्थितः । अत्रान्तरे स देवदत्तः शयन[2] आगत्योपविष्टः । तं दृष्ट्वा रथकारो रोषाविष्टचित्तो व्यचिन्तयत् । किमेनमुत्थाय विनाशया[3]म्यथवा द्वावप्येतौ सुप्तौ हेलया हन्मि[4] । परं पश्यामि तावच्चेष्टितमस्याः शृणोमि चानेन सहालापान् । अत्रान्तरे सा गृहद्वारं निभृतं विधाय शयनतलमारूढा । तस्यास्तच्छयनमारोहन्त्या रथकारशरीरे पादो लग्नः । ततो व्यचिन्तयत् । नूनमेतेन दुरात्मना रथकारेण मत्परीक्षणार्थं भाव्यम् । तत्स्त्रीचरित्रविज्ञानं किमपि करोमि । एवं तस्याश्चिन्तयन्त्याः स देवदत्तः स्पर्शोत्सुको बभूव । ततश्च तया कृताञ्जलिपुटयाभिहितं भो महानुभाव न मे गात्रं त्वया स्प्रष्टव्यं[6] यतोऽहं पतिव्रता महासती च । नो चेच्छापं दत्त्वा त्वां भस्मसात्करिष्यामि । स आह यद्येवं तर्हि किमर्थं त्वयाहमाहूतः[7] सा प्राह भोः शृण्वेकाग्रमनाः । अहमद्य प्रत्यूषे देवतादर्शनार्थं चण्डिकायतनं गता । तत्राकस्मात्खे वाणी संजाता । पुत्रि किं करोमि । भक्तासि मे त्वम् । परं षण्मासाभ्यन्तरे विधिनियोगाद्विधवा भविष्यसि । ततो मयाभिहितं—भगवति यथा त्वमापदं वेत्सि तथा तत्प्रतीकारमपि जानासि । तदस्ति कश्चिदुपायो येन मे पतिः शतसंवत्सरजीवी भवति । ततस्तयाभिहितं वत्से सन्नपि नास्ति यतस्तवायत्तः स प्रतीकारः । तच्छ्रुत्वा मयोक्तं देवि यन्मत्प्राणैर्भवति तदादेशय येन करोमि । ततो देव्याभिहितम् यद्यद्यदिने परपुरुषेण सहैकस्मिञ्छयने समारुह्यालिङ्गनं करोषि तत्तव भर्तृसक्तोपमृत्युस्तस्य संचरति त्वद्भर्ता पुनर्वर्षशतं[11] जीवति । तेन मया त्वमभ्यर्थितः । ततो यत्किंचित्कर्तुमनास्तत्कुरुष्व । न हि देवतावचनमन्यथा भविष्यतीति मे निश्चयः । सोऽपि रथकारो मूर्खस्तस्यास्तद्वचनमाकर्ण्य पुलकाङ्किततनुः शय्यातला[12]न्निष्क्रम्य तामुवाच । साधुपति[13]व्रते साधु कुलनन्दिनि साधु । अहं दुर्जनवचनशङ्कितहृदयस्त्वत्परीक्षार्थं ग्रामान्तरव्याजं कृत्वात्र निभृतं खट्वातले लीनः स्थितः । तदेह्यालिङ्गय

निभृतः छन्नः । अञ्जलेः पुटं अ० टं कृतमञ्जलिपुटं यया । महानुभाव महासत्व । एकमेव अग्रं यस्य तदेकाग्रं मनो यस्य । शतं संवत्सरान् जीवतीति । मत्प्राणैर्मम प्राणव्ययेनापि । पुलकैः रोमाञ्चैः आङ्किता तनुर्यस्य । ग्रामान्तरव्याजं ग्रामान्तरगमनमिषम् ।

---

१ शय्याधःस्थले. २ समागत्य तत्र शरणे उप. ३ हन्मि. ४ व्यापादयामि. ५ अथ. ६ स्पर्शनीयं. ७ अत्रानीतः. ८ आकस्मिकी. ९ त्वमेतज्जानासि... वेत्सि. १० यदि तत. ११ पुनरन्यद्वर्षशतद्वयं. १२ अधस्तलात्. १३ साधु पवित्रे.

माम्। एवमुक्त्वा तामालिङ्ग्य स्वस्कन्धे कृत्वा तं देवदत्तमभ्युवाच। भो महानुभाव मत्पुण्यैस्त्वमिहागतः। त्वत्प्रसादात्प्राप्तमद्य मया वर्षशत-प्रमाणमायुः। ततस्त्वमपि मां समालिङ्ग्य स्कन्धं मे समारोह। इति जल्पन्ननिच्छन्तमपि देवदत्तं बलादालिङ्ग्य स्कन्धे समारोपितवान्। त-तश्च तूर्यध्वनिच्छन्देन नृत्यन्सकलगृहद्वारेषु बभ्राम। अतोहं ब्रवीमि। प्रत्यक्षेपि कृते पापे इति। तन्मूढ दृष्टविकारस्त्वम्। तत्कथं तव गृहं ग-च्छामि। अथवा यन्मां त्वं विश्वासयसि तत्ते दोषो नास्ति यत ईदृशी स्वभावदुष्टा युष्मज्जातिर्या शिष्टसङ्गादपि सौम्यत्वं न याति। अथवा स्वभावोयं दुष्टानाम्। उक्तं च—

सद्भिः संबोध्यमानोपि दुरात्मा पापपौरुषः।
घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति ॥ ५४ ॥

अथवा साध्विदमुच्यते—

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम्।
स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥ ५५ ॥

मकर आह—कथमेतत्। सोब्रवीत्—

कथा ८।

अस्ति कस्मिंश्चिदधिष्ठाने तपोवने शालङ्कायनो नाम तपोधनो जाह्नव्यां स्नानार्थं गतः। तस्य च सूर्योपस्थानं कुर्वतस्तत्र प्रदेशे मूषिका काचि-त्खरतरनखाग्रपुटेन श्येनेन गृहीता। तां दृष्ट्वा स मुनिः करुणार्द्रहृदयो मुञ्च मुञ्चेति कुर्वाणस्तस्य पाषाणखण्डं प्राक्षिपत्। सोपि पाषाणखण्डप्र-हारव्याकुलेन्द्रियो भ्रष्टमूषिको भूमौ निपपात। मूषिकापि भयत्रस्ता कर्तव्यमजानती रक्ष रक्षेति जल्पन्ती मुनिचरणान्तिकमुपाविशत्। श्येनेनापि चेतनां लब्ध्वा मुनिरुक्तः। यद्भो मुने न युक्तमनुष्ठितं भवता

पर्जन्यं मेघम्। अतिशयेन खराणि खरतराणि नखाग्राणि तेषां पुटेन खरतरं नखाग्रपुटं यस्य तेन इति वा। पाषाणखण्डस्य प्रहारस्तेन व्याकुलानि इन्द्रियाणि यस्य। भ्रष्टो मूषको यस्मात्। कर्तव्यमजानती किंकर्तव्यतामूढा।

१ अस्मात्परं—त्वं स्वभर्तृभक्तानां मुख्या नारीणां यदेवं ब्रह्मव्रतं परसङ्गेपि पालितवती। मदायुर्वृद्धिकृतेऽपमृत्युविनाशार्थं च त्वमेवं कृतव्रती। तामेवमुक्त्वा सस्ने-हमालिंगितवान्। इत्यधिकं पुस्तकान्तरे. २ शतद्वय. ३ ततश्च नृत्यं कृत्वा हे ब्रह्मव्रतधराणां धुरीण त्वयापि मय्युपकृतमित्याद्युक्त्वा स्कन्धादुत्तार्य यत्र यत्र स्वजनगृहद्वारादिषु बभ्राम तत्र तत्र तयोरुभयोरपि तद्गुणवर्णनमकरोत्। इ. पा. ४ स्वयोनिं. ५ अस्याः कथायाः पूर्वभागः पुस्तकद्वये भिन्न उपलब्धोन्ते निवे-शितस्तत्रैव द्रष्टव्यः।

यदहं पाषाणेन ताडितः । किं त्वमधर्मान्न बिभेषि । तत्समर्पय ममैनां मूषिकाम् । नो चेत्प्रभूतं पातकमवाप्स्यसि । इति ब्रुवाणं श्येनं प्रोवाच सः । भो विहंगाधम रक्षणीयाः प्राणिनां प्राणाः । दण्डनीया दुष्टाः । संमाननीयाः साधवः । पूजनीया गुरवः । स्तुत्या देवाः । तत्किमसंबद्धं प्रजल्पसि । श्येन आह । मुने न त्वं सूक्ष्मधर्मं वेत्सि । इह हि सर्वेषां प्राणिनां विधिना सृष्टिं कुर्वताहारोपि विनिर्मितः । ततो यथा भवतामन्नं तथास्माकं मूषिकादयो विहिताः । तत्स्वाहारकाङ्क्षिणं मां किं दूषयसि । उक्तं च ।

यद्यस्य विहितं भोज्यं न तत्तस्य प्रदुष्यति ।
अभक्ष्ये बहुदोषः स्यात्तस्मात्कार्यो न व्यत्ययः ॥ ५६ ॥
मद्यं यथा द्विजातीनां मद्यपानां यथा हविः ।
भक्ष्यमभक्ष्यतामेति तथान्येषामपि द्विज ॥ ५७ ॥
भक्ष्यं भक्षयतां श्रेयो अभक्ष्यं तु महदघम् ।
तत्कथं मां वृथाचारं त्वं दण्डयितुमर्हसि ॥ ५८ ॥

अपरं मुनीनां न चैष धर्मो यतस्तैर्दृष्टमदृष्टं श्रुतमश्रुतमलौल्यत्वमशठत्वं प्रशस्यते । उक्तं च —

समः शत्रौ च मित्रे च समलोष्टाश्मकाञ्चनः ।
सुहृन्मित्रे ह्युदासीनो मध्यस्थो द्वेष्यबन्धुषु ॥ ५९ ॥
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ।
साधूनां निरवद्यानां सदाचारविचारिणाम् ॥ ६० ॥
योगी युञ्जीत सततमात्मानं रहसि स्थितः ।

तत्त्वमनेन कर्मणा भ्रष्टतपाः संजातः । उक्तं च —

मुञ्च मुञ्च पतत्येको मा मुञ्चेति द्वितीयकः ।
उभयोः पतनं दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ ६१ ॥

शालङ्कायन आह — कथमेतत् । श्येन आह —

सूक्ष्मधर्मं धर्मस्य प्रतनुतत्त्वं । विहितं शास्त्रेणानुज्ञातं । प्रदुष्यति दोषार्हं भवति। व्यत्ययः स्वभक्ष्यातिक्रमः । श्रेयः कल्याणं । अभक्ष्यं भक्षयतां महदघं पापम् । वृथा आचारो यस्य तादृशमिव । यद्वा माऽवृथाचारमिति पठनीयम् । दृष्टमदृष्टं प्रशस्यते तैः दृष्टमपि किंचिददृष्टवत्स्यादित्यर्थः । श्रुतमिति किमपि श्रुत्वा न तत्र प्रवर्तेरन् किंतु अश्रुतवन्त इव अविकृतास्तिष्ठेयुरित्यर्थः । समं लोष्टमश्मा कांचनं च यस्य । सुहृदो मित्रं तस्मिन् । यद्वा सुहृदश्च मित्राणि च सुहृन्मित्रं तस्मिन् । एतादृशो मुनिः विशिष्यते प्रशस्यते । निरवद्यानामनिन्द्यानाम् । सन्साधुश्चासौ आचारश्च तेन विचरन्तीति तेषाम् ।

कथा ९.

कस्मिंश्चिन्नदीतटे एकतद्वितत्रिताभिधानास्त्रयोऽपि भ्रातरो मुनयस्तपः कुर्वन्ति। तेषां च तपःप्रभावादाकाशस्था धौतपोतिका निरालम्बा जलार्द्रा भूस्पर्शनभयेन स्नानसमये तिष्ठन्ति। अथान्येद्युर्मयेव काचिन्मण्डूकिका केनापि गृध्रेण बलेन नीता। अथ तां गृहीतां विलोक्य तेषां ज्येष्ठेन करुणार्द्रहृदयेन भवतेव व्याहृतम्। मुञ्च मुञ्चेति। अत्रान्तरे तस्य धौतपोतिकाकाशाद्भूमौ पतिता। तां पतितां दृष्ट्वा द्वितीयेन तद्भयार्त्तेन मा मुञ्च मामुञ्चेत्यभिहितं यावत्तावत्तस्यापि पपात। ततस्तृतीयो द्वयोरपि धौतपोतिकां भूमौ पतितां दृष्ट्वा तूष्णीं बभूव। अतोहं ब्रवीमि— मुञ्च मुञ्च पतत्येक इति।

तच्छ्रुत्वा मुनिर्विहस्याह। भो मूर्ख विहंगम कृतयुगे धर्मः स आसीत्। यतः कृतयुगे पापालपितोऽपि पापं जायते तेन धौतपोतिके पतिते अशिष्टालापेन न सदपवचनदोषतः। एष पुनः कलियुगः। अत्र सर्वोऽपि पापात्मा। तत्कर्म कृतं विना पापं न लगति। उक्तं च—

> संचरन्तीह पापानि युगेष्वन्येषु देहिनाम्।
> कलौ तु पापसंयुक्ते यः करोति स लिप्यते ॥ ६२ ॥

उक्तं च—

> आसनाच्छयनाद्यानात्संगतेश्चापि भोजनात्।
> कृते संचरते पापं तैलबिन्दुरिवाम्भसि ॥ ६३ ॥

तत्किं वृथाप्रलपितेन। गच्छ त्वम्। नो चेच्छापयिष्यामि। अथ गते श्येने मूषिकया स मुनिरभिहितः। भगवन् नय मां स्वाश्रयम्। नो चेदन्यो दुष्टपक्षी कश्चिन्मां व्यापादयिष्यति। तदहं तत्रैवाश्रये त्वद्दत्तान्नाहारबुद्ध्या कालं नेष्यामि। सोऽपि दाक्षिण्यवान्सकरुणो व्यचिन्तयत् कथं मया मूषिका हस्ते धृता नेया जनहास्यकारिणी। तदेनां कुमारिकां कृत्वा नयामि। एवं सा कन्यका कृता। तथानुष्ठिते कन्यासहितं मुनिमवलोक्य पत्नी पप्रच्छ। भगवन् कुत इयं कन्या। स आह—एषा मूषिका श्येनभयाच्छरणार्थिनी कन्यारूपेण तव गृहमानीता। तत्त्वया यत्नेन रक्ष-

---

धौतपोतिका धौतवस्त्राणि। निरालम्बा आश्रयेण विनापि ऊर्ध्वस्थितास्तिष्ठन्ति। तद्भयार्तेन पोतिकापतनभयाकुलेन। मुञ्च मुञ्चेति वदन् एकः पतति स्वतपःप्रभावाद्भ्रश्यते। उभयोः पतनं दृष्ट्वा तृतीयो मौनं भेजे तत्सर्वार्थ० इत्यर्थः। पापेन सह पापस्य वा आलापेन। अशिष्टेन श्येनेन सह य आलापस्तेन। न सतः अपवचनं निन्दा तद्दोषतः। त्वया दत्ता अन्नाहारमुष्टिरतया। दाक्षिण्यवान् दाक्षिण्यं परच्छन्दानुवर्तित्वमौदार्यं वा तद्वान्। उपनेता उपनयनस्य कर्ता।

णीया । भूयोऽप्येनां मूषिकां करिष्यामि । सा प्राह—भगवन् मैवं कार्षीः । अस्यास्त्वं धर्मपिता । उक्तं च—

जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ ६४ ॥

तत्त्वयास्याः प्राणाः प्रदत्ताः । अपरं ममाप्यपत्यं नास्ति । तस्मादेषा मम सुता भविष्यति । तथानुष्ठिते सा कन्यका शुक्लपक्षचन्द्रकलिकेव नित्यमेव वृद्धिं प्राप्नोति । सापि तस्य मुनेः शुश्रूषां कुर्वती सपत्नीकस्य यौवनमाश्रयात् । अथ तां यौवनोन्मुखीमवलोक्य शालङ्कायनः स्वपत्नीमुवाच । प्रिये यौवनोन्मुखी वर्तते इयं कन्या । अनर्हा सांप्रतं मद्गृहवासस्य । उक्तं च—

अनूढा मन्दिरे यस्य रजः प्राप्नोति कन्यका ।
पतन्ति पितरस्तस्य स्वर्गस्था अपि तैर्गुणैः ॥ ६५ ॥

तत्कस्मैचिच्छ्रेष्ठवराय प्रदीयते । उक्तं च—

वरं वरयते कन्या माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥ ६६ ॥

तथा च । यावन्न लज्जते कन्या यावत्क्रीडति पांसुना ।
यावत्तिष्ठति गोमार्गे तावत्कन्यां विवाहयेत् ॥ ६७ ॥
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ॥
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ ६८ ॥

तथा च ।

कुलं च शीलं च सनाथतां च विद्यां च वित्तं च वपुर्वयश्च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥ ६९ ॥

अन्यच्च ।

दूरस्थानामविद्यानां मोक्षधर्मानुवर्तिनाम् ॥
शूराणां निर्धनानां च न देया कन्यका बुधैः ॥ ७० ॥

तद्यद्यस्या रोचते तद्भगवन्तमादित्यमाकार्य तस्मै प्रयच्छामि । उक्तं च—

अनिष्टः कन्यकाया यो वरो रूपान्वितोपि यः ।
यदि स्यात्तस्य नो देया कन्या श्रेयोभिवाञ्छता ॥ ७१ ॥

साह—को दोषोत्र विषये । एवं क्रियताम् । अथ मुनिना समाहूतः

चन्द्रकलिका प्रतिपच्चन्द्रः । शुश्रूषा सेवा । आशु शीघ्रं यौवनमयात्प्राप । यौवनोन्मुखीं तारुण्यप्रान्तवर्तिनीं । अनूढा अविवाहिता । तैः प्रसिद्धैः गुणैः स्वर्गस्थ । अपि । यद्वा तद्गुणैरिति पठनीयं । रजःप्राप्तिनिष्ठैरधर्मादिदोषैः इत्यर्थः । सनाथतां नाथेन रक्षित्रा पित्रादिना सहितः सनाथस्तस्य भावस्तत्ता ताम् । आकार्याहूय .

---

१ रविराहूतः । वेदमन्त्रामंत्रणप्रभावात्तत्क्षणादेवाभ्युपगम्यादित्यः प्रोवाच । इ. पा.

सविता तत्क्षणमेवाभ्युपेत्य प्रोवाच । भगवन् वद कुतं किमर्थमहमाहूतः । स आह—एषा मत्कन्या यदि त्वां वृणोति तद्विवाहय । एवमुक्त्वा स भगवांस्तस्या दर्शितः । प्रोवाच च । पुत्रि किं तव रोचत एष भगवांस्त्रैलोक्यदीपः । सा प्राह—तात अतिदहनात्मकोयम् । नाहमेनमभिलषामि । अस्मादपि यः कश्चिदुत्कृष्टतरः स आहूयताम् । अथ तस्यास्तद्वचनमाकर्ण्य भास्वरोपि तां मूषिकां विदित्वा निःस्पृहस्तमुवाच । भगवन् अस्ति ममाप्यधिको मेघो येनाच्छादितस्य मे नामापि न ज्ञायते । अथ मुनिना मेघमप्याहूय कन्याभिहिता । एष ते रोचते । सा प्राह कृष्णवर्णोयं जडात्मा च । तदस्मादन्यस्य कस्यचित्प्रधानस्य मां प्रयच्छ । अथ मुनिना मेघोपि पृष्टः भोस्त्वत्तोप्यधिकः कोप्यस्ति । स आह—मत्तोप्यधिकोस्ति वायुः । वायुना हतोहं सहस्रधा यामि । तच्छ्रुत्वा मुनिना वायुराहूतः । आह च पुत्रिके किमेष वायुस्ते विवाहाय उत्तमः प्रतिभाति । सा प्राह—तात प्रबलोप्ययं चञ्चलः । तदभ्यधिकः कश्चिदानीयताम् । मुनिराह । भो वायो तवाभ्यधिकोस्ति कश्चित् । स आह—मत्तोप्यधिकोस्ति पर्वतो येन संस्तभ्य बलवानप्यहं ध्रिये । अथ मुनिः पर्वतमाहूय कन्याया अदर्शयत् । पुत्रिके त्वामस्मै प्रयच्छामि । साह तात कठिनात्मकोयं स्तब्धश्च । तदन्यस्मै देहि माम् । अथ स मुनिना पृष्टः । यद्भोः पर्वतराज तवाप्यधिकः कश्चिदस्ति । स आह—सन्ति ममाप्यधिका मूषका ये मद्देहं बलात्सर्वतो भेदयन्ति । तदाकर्ण्य मुनिर्मूषकमाहूय तस्या अदर्शयत् । पुत्रिके एष ते प्रतिभाति मूषकराजो येन यथोचितमनुष्ठीयते । सापि तं दृष्ट्वा स्वजातीय एष इति मन्यमाना पुलकोद्भूषितशरीरा प्रोवाच । तात मां मूषिकां कृत्वास्मै प्रयच्छ येन स्वजातिविहितं गृहधर्ममनुतिष्ठामि । तच्छ्रुत्वा तेन स्त्रीधर्मविचक्षणेन तां मूषिकां कृत्वा मूषकाय प्रदत्ता । अथवा साध्विदमुच्यते—

न सुवर्णं न रत्नानि न च राज्यपरिक्रियाम् ।
तथा वाञ्छन्ति कामिन्यो यथाभीष्टतमं वरम् ॥ ७२ ॥

उत्तमो योग्यतमः । यथोचितं मूषिकारूपदानादि । पुलकैः उद्भूषितं शरीरं यस्याः ।

---

१ मदीया कन्यका तिष्ठति । यद्येषां त्वां वृणोति तर्हि उद्वहस्व. २ प्रकृष्टतरः ३ उत्तमः. ४ ०तोहमदृश्यो भवामि । ५ अस्मै त्वां प्रयच्छामि । ६ मुनिमाह यन्मां मेघादपि श्रेष्ठाय प्र०. ७ भो मेघ; तवाप्य०. ८ चपलः. ९ श्रेष्ठतरः १० ममाप्यधिकाः पर्वताः सन्ति यैः...बलवन्तोपि वयं ध्रियामहे. ११ मच्छरीरं बलाद्विदारयन्ति. १२ आह च पुत्रिके त्वामस्मै प्रयच्छामि किमेष प्रतिभाति ते मूषिकराजः । १३ प्रोद्भूषित-रान्ता. १४ गृहस्थ०...अनुभवामि । १५ ततः सोपि स्वतपोबलेन तां मूषिकां कृत्वा तस्मै प्रादात् । इ. पा.

तद्यथा सा मूषिका देवपदं त्यक्त्वा स्वजातिदोषेण नीचसंगमं गता तथा त्वमपि मया संगतोऽपि स्नेहगृहीतोऽपि स्वजातिधर्मदुष्टः संजातः। अतोऽहं ब्रवीमि—सूर्यं भर्तारमुत्सृज्य इत्यादि। तन्मूर्ख स्त्रीलुब्ध स्त्रीजित अन्येऽपि ये त्वद्विधा भवन्ति ते स्वकार्यं विभवं मित्रं च परित्यजन्ति तत्कृते। उक्तं च—

या ममोद्विजते नित्यं साद्य मामवगूहते।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ७३ ॥

मकर आह—कथमेतत्। सोऽब्रवीत्—

कथा १०।

अस्ति कस्मिंश्चिदधिष्ठाने कामातुरो नाम महाधनी वृद्धवणिक्। तेन मृतभार्येण कामोपहतचेतसा काचिन्निर्धनवणिक्सुता प्रभूतं वित्तं दत्त्वोद्वाहिता। अथ सा दुःखाभिभूता तं वृद्धवणिजं वीक्षितुमपि न शक्नोति। अथवा साध्विदमुच्यते—

श्वेतं पदं शिरसि वीक्ष्य शिरोरुहाणां
स्थानं परं परिभवस्य तदेव पुंसाम्।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७४ ॥

तथा च।

गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता
दृष्टिर्भ्रश्यति रूपमेव ह्रसते वक्त्रं च लालायते।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते
हा कष्टं जरयाभिभूतपुरुषः पुत्रैरवज्ञायते ॥ ७५ ॥

अथ कदाचित्सा तेन सहैकशयने पराङ्मुखी स्थिता यावत्तिष्ठति तावत्तस्य गृहे चौरः प्रविष्टः। सापि तं चौरमवलोक्य भयव्याकुलमनास्तं

स्वजातिनिष्ठा धर्माः स्वजातिधर्मास्तैर्दुष्टो विकृतः। शिरोरुहाणां केशानां। परिभवस्य तरुणीकृततिरस्कारस्य। आरोपितमस्थिशकलं तन्निदर्शकं यस्मिन्।

१ अस्मात्परं—चौरेण चाप्युक्तम्—हर्तव्यं ते न पश्यामि हर्तव्यं चेद्भविष्यति। पुनरप्यागमिष्यामि यदीयं नावगूहते॥ अरिमर्दनः पृष्टवान्—का च नावगूहते। कश्चायं चौर इति विस्तरतः श्रोतुमिच्छामि। दीप्ताक्षः कथयति। इति पुस्तकान्तरे तृतीयतन्त्रान्तर्गताया अस्याः कथायाः प्रारम्भेऽधिकः संदर्भः। २ कामा तो. ३ वणिक्पुत्रो वृद्धः. ४ निर्धनस्य दुहिता. ५ वृद्धतमं. ६ द्रष्टुम ... शशाक. ७ वर्णे सिते. ८ यत्तु. ९ चक्षुः. १० मप्युपहतं. ११ पं पुनोऽप्य. १२ स्थिता.

वृद्धमप्यालिङ्गितवती। सोपि विस्मयात्पुलकाङ्कितसर्वगात्रश्चिन्तयामास। अहो किमेषा मामद्यावगूहते। अहो चित्रमेतत्। ततश्च यावन्निपुणतयावलोकयति तावच्चौरः प्रविष्टः कोणैकदेशे तिष्ठति। पुनरचिन्तयत्। नूनमेषा चौरस्य भयान्मामालिङ्गति। तज्ज्ञात्वा चौरमाह—

या ममोद्विजते नित्यं साद्य मामवगूहते।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत्॥ ७६॥

भूयोपि निर्गच्छन्तमवादीत्। भो चोर नित्यमेव त्वया रात्रावागन्तव्यम्। मदीयोयं विभवस्त्वदीय इति। अतोहं ब्रवीमि—या ममोद्विजते नित्यं इत्यादि। किं बहुना। तेन च शीलुब्धेन स्वं सर्वमपि चौरस्य समर्पितम्। त्वयापि तथानुष्ठितम्। अथैवं तेन सह वदतो मकरस्य जलचरेण केनाप्यागत्याभिहितम्—भो मकर त्वदीया भार्यानशनोपविष्टा त्वयि चिरयति प्रणयाभिभवाद्विपन्ना। सोपि तच्छ्रुत्वातीव व्याकुलमनाः प्रालपत्। अहो किमिदं संजातं मम मन्दभाग्यस्य। उक्तं च—

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते॥ ७७॥
वृक्षमूलेपि दयिता यत्र तिष्ठति तद्गृहम्।
प्रासादोपि तया हीनो अरण्यसदृशः स्मृतः॥ ७८॥

तथा च।

माता यस्य गृहे नास्ति भार्या च प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥ ७९॥

तन्मित्र क्षम्यतां मया तेपराधः कृतः। संप्रत्यहं तद्वियोगाद्वह्निप्रवेशं करिष्यामि। तदाकर्ण्य वानरः प्रहस्य प्रोवाच। भो ज्ञातस्त्वं मया प्रथममेव यत्स्त्रीजितः स्त्रीवश्यश्च। सांप्रतं पुनः प्रत्ययः संजातः। तन्मूढ आनन्दे कार्ये त्वं कस्माद्विषादं गतः। तादृग्दुष्टभार्यायां मृतायामुत्सवः कर्तुं युज्यते। उक्तं च—

या भार्या दुष्टचरिता सततं कलहप्रिया।
भार्यारूपेण सा ज्ञेया विदग्धैर्दारुणा जरा॥ ८०॥
तस्मात्सर्वप्रयत्नेन नामापि परिवर्जयेत्।
स्त्रीणामिह हि सर्वासां य इच्छेत्सुखमात्मनः॥ ८१॥

निपुणतया सूक्ष्मदृष्ट्या। विपन्ना मृता। प्रियः कलहो यस्याः।

---

१ वृद्धमपि तं पतिं गाढं समालिलिंग. २ पश्यति तावद्गृहकोणैकदेशे चौरं दृष्ट्वा व्यचिं०. ३ अस्य. ४ शंकया मां समा०. ५ एवं वज्रपातसदृशं वचनमाकर्ण्यातीव ०हृदयः प्रलपितमेवं चकार. ६ अरण्यसदृशं फलम्. ७ यत्किंचिन्मयापराद्धम्. ८ स्त्रीवियोगाद्वैश्वानरम्. ९ च. १० चारित्रा.

के नाम न विनश्यन्ति मिथ्याज्ञानान्नितम्बिनीम्।
रम्यां बुद्धोपसर्पन्ति ये ज्वालां शलभा इव ॥ ८२ ॥
अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥ ८३ ॥
यदन्तस्तन्न जिह्वायां यज्जिह्वायां न तद्बहिः।
यद्बहिस्तन्न कुर्वन्ति विचित्रचरिताः स्त्रियः ॥ ८४ ॥
ताडिता अपि दण्डेन शस्त्रैरपि विखण्डिताः।
न वशं योषितो यान्ति न दानैर्न च संस्तवैः ॥ ८५ ॥
आस्तां तावत्किमन्येन दौरात्म्येनेह योषिताम्।
विधृतं स्वोदरेणापि घ्नन्ति पुत्रमपि स्वकम् ॥ ८६ ॥
रूक्षायां स्नेहसद्भावं कठोरायां सुमार्दवम्।
नीरसायां रसं बालो बालिकायां विकल्पयेत् ॥ ८७ ॥

मकर आह—भो मित्र अस्त्वेतत्। परं किं करोमि। ममानर्थद्वयमेतत्संजातम्। एकस्तावद् गृहभङ्गोपरस्तु त्वद्विधेन मित्रेण सह चित्तविश्लेषः। अथवा भवत्येवं दैवोपहतानाम्। उक्तं च—

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव।
नाभूज्जारो न भर्ता च किं निरीक्षसि नग्निके ॥ ८८ ॥

वानर आह—कथमेतत्। सोऽब्रवीत्—

कथा ११।

कस्मिंश्चिदधिष्ठाने हालिकदंपती प्रतिवसतः स्म। सा च हालिकभार्या पत्युर्वृद्धभावात्सदैवान्यचित्ता न कथंचिद्गृहे स्थैर्यमालम्बते। केवलं परपुरुषान्वेषणा भ्रमति। अथ केनचित्परवित्तापहारकेण धूर्तेन सा लक्षिता विजने प्रोक्ता च—सुभगे मृतभार्योऽहं तव रूपलावण्यदर्शनेन हृदये स्मरबाणेन पीडितः। तद्दीयतां मे रतिदक्षिणा। ततस्तयाभिहितम्—भोः सुभग यद्येवं तदस्ति मे पत्युः प्रभूतं धनम्। स वृद्धभावात्प्रचालितु-

---

मिथ्या स्त्री रम्या इत्ययथार्थं ज्ञानं तस्मात्। प्रशस्तो नितम्बोऽस्याः सा नितम्बिनी। अन्तः मनसि। संस्तवैः स्तुतिभिः। स्वोदरेण विधृतं स्वपुत्रमपि इत्य०। रूक्षायां निःस्नेहायां। बालो मूढः। य एवं करोति स मूढ इत्यर्थः। हालिकः कृषीवलः। हलेन सीरेण खनतीति। परपुरुषस्यान्वेषणं गवेषणं यस्याः।

---

१ य उप. दीपाभां. २ हिर्वृत्त्या. ३ मण्डनैर्नच कुंकुमैः ४ नात्र. ५ पुत्रं स्वकं रुषा. ६ संभारं ७ दैवयोगात्. ८ न जारो नच. ९ पत्नी. १० किंचिदपि. ११ नन्वेषमाणा परि. १२ अन्यदा. १३ स्मरपीडितश्च.

मप्यसमर्थः । अतस्तद्धनमादायाहमागच्छामि । पश्चात्त्वया सहान्यत्र गत्वा यथेच्छं रतिसौख्यमनुभवामि । स आह—रोचते ममाप्येतत् । तत्प्रत्यूषेत्र स्थाने समागन्तव्यं येन शुभतरं किंचिन्नगरं गत्वा त्वया सह जीवलोकसुखमनुभवामि । सापि तथेति प्रतिज्ञाय प्रहसितवदना स्वं गृहं गत्वा रात्रौ भर्तरि प्रसुप्ते सर्वं धनमादाय प्रत्यूषे तत्कथितस्थानमुपाद्रवत् । धूर्तोपि तामग्रे कृत्वा दक्षिणां दिशमाश्रित्य सत्वरगतिः प्रस्थितः । अथ तयोर्व्रजतोर्योजनद्वयमात्रेणाग्रतो नदीं समुपस्थितां दृष्ट्वा धूर्तश्चिन्तयामास—किमहमनया यौवनप्रान्ते वर्तमानया करिष्यामि । किंच कदाचिदस्याः पृष्ठतः कश्चित्समागमिष्यति । तन्मे महाननर्थः स्यात् । तत्केवलं वित्तमादाय गच्छामि । इति निश्चित्य तामुवाच—प्रिये सुदुस्तरेयं नदी । तत्तावदहं द्रव्यमात्रां पारे धृत्वा समागच्छामि । ततस्त्वामेकाकिनीं पृष्ठमारोप्य सुखेनोत्तारयिष्यामि । सा प्राह सुभग एवं क्रियताम् । एवमुक्त्वा तस्मा अशेषं वित्तमर्पयामास । अथ तेन भिहितम्-प्रिये परिधानाच्छादनवस्त्रमपि समर्पय येन जलमध्ये निःशङ्का व्रजसीति । तथानुष्ठिते धूर्तो वित्तं वस्त्रयुगलं चादाय यथाचिन्तितं विषयं गतः। सापि कण्ठनिवेशितहस्तयुगला सोद्वेगा नदीतीरे यावदुपविष्टा तिष्ठति तावत्तत्रान्तरे काचिच्छृगालिका वदनगृहीतमांसपिण्डा तत्राजगाम । आगत्य च यावत्पश्यति तावन्नदीतीरे महामत्स्यः सलिलान्निष्क्रम्य बहिः स्थित आस्ते । तं दृष्ट्वा सा मांसपिण्डमुत्सृज्य तं मत्स्यं प्रत्युपाद्रवत् । अत्रान्तर आकाशादवतीर्य कोपि गृध्रस्तं मांसपिण्डमादाय पुनः खमुत्पपात । मत्स्योपि शृगालिकां दृष्ट्वा नद्यां प्रविष्टः । अथ सा व्यर्थश्रमा तं गृध्रं विलोकयन्ती शृगालिका तया नग्निकया सस्मितमभिहिता—

गृध्रेणापहृतं मांसं मत्स्योपि सलिलं गतः ।
मत्स्यमांसपरिभ्रष्टे किं निरीक्षसि जम्बुके ॥ ९० ॥

तच्छ्रुत्वा शृगालिका तामपि पतिधनजारपरिभ्रष्टां दृष्ट्वा सोपहासमाह—

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
नाभूज्जारो न भर्ता च किं निरीक्षसि नग्निके ॥ ९१ ॥

यौवनस्य प्रान्तोन्तिमावस्था तत्र वर्तमानया । योजनयोर्द्वयं योजनद्वयं तदेव योज०म् । वदनेन गृहीतो मांसपिण्डो यया । द्वौ गुणौ यस्य तत् द्विगुणम् ।

---

१ येन. २ ममाप्ये. ३ शीघ्रमेव समा. ४ सुन्दरं. ५ कः सफलीक्रियते. ६ प्रसुप्तस्य पत्युः. ७ एवं च सप्रमोदं तया सह वार्तासुखमनुभवन् योजनद्वयेऽतीते. ८ अर्धजरत्या. ९ महानदी. १० येन त्वां. ११ नयामि. १२ भद्र. १३ भद्रे. १४ केवलं वित्तमा० वाञ्छितवि० धूर्तः. १५ नदीपुलिनदेशे. १६ तत्रागमत्. १७ णापि. १८ नु पश्यसि. १९ कोपयुक्तया शृगाल्याभिहितम्. २० न जारो न च.

एवं तस्य कथयतः पुनरन्येन जलचरेणागत्य निवेदितम्–यदहो त्वदीयं गृहमप्यपरेण महामकरेण संगृहीतम् । तच्छ्रुत्वासावतिदुःखितमनास्तं गृहान्निःसारयितुमुपायं चिन्तयन्नाह । अहो पश्यत मे दैवोपहतत्वम् ।

मित्रं चामित्रतां यातमपरं मे प्रिया मृता ।
गृहमन्येन च व्याप्तं किमद्यापि भविष्यति ॥ ९२ ॥

अथवा युक्तमिदमुच्यते । छिद्रेष्वनर्था बहुलीभवन्तीति । तत्किं करोम्यनेन सह युद्धं किंवा साम्नैव संबोध्य गृहान्निःसारयामि किंवा भेदं दानं वा करोमि । अथवाशुमेव वानरं मित्रं पृच्छामि । उक्तं च—

यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान्स्वहितान्गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि ॥ ९३ ॥

इति विचिन्त्य भूयोपि जम्बूपादपमारूढं कपिमपृच्छत् । भो मित्र पश्य मे मन्दभाग्यतां यत्संप्रति गृहमपि मे बलवत्तरेण मकरेण रुद्धम् । तदहं त्वां पृच्छामि कथय किं करोमि । सामादीनामुपायानां मध्ये कस्यात्र विषयः । स आह—भोः कृतघ्न मया निषिद्धोपि किं भूयो मामनुसरसि । नाहं तव मूर्खस्योपदेशमपि ददामि । उक्तं च यतः ।

उपदेशो न दातव्यो यादृशे तादृशे नरे ।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥ ९४ ॥

मकर आह--कथमेतत् । सोब्रवीत्—

कथा १२ ।

कस्मिंश्चिदरण्ये वृक्षशाखाकृतकुलायौ पक्षिदंपती प्रतिवसतः स्म । अथ कदाचिन्माघमासेऽकालवृष्टिसमाहतोऽसौम्यवातकम्पिततनुः कश्चिद्वानरस्तदेव वृक्षमूलमुपागतः । सोपि दन्तवीणां वादयन्संकुचितकरचरणश्चटकया सानुकम्पमभिहितः ।

हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः ।
शीतवाताहतो मूढ कथं न कुरुषे गृहम् ॥ ९५ ॥

प्रष्टव्यान् प्रष्टुमर्हान् । यथार्थवादिन इत्यर्थः । साम्ना सान्त्वनेन । भेद उपजापो द्वैधं वा अत्र विषयः प्रस्तुते उपयोगी । शोभनं गृहं यस्याः सा सुगृही । वृक्षशाखायां कृतः कुलायो नीडो याभ्याम् । असौम्यः चण्डो यो वातस्तेन कम्पिता तनुर्यस्य ।

---

१ दैवम्. २ अस्य स्थाने–क्षते प्रहारा निपतन्त्यभीक्ष्णमन्नक्षये वर्धति जाठराग्निः । आपत्सु वैराणि समुद्भवन्ति वामे विधौ सर्वमिदं नराणाम् ॥ इति पद्यमे. पु०. ३ करोमि । किमनेन सह युद्धं करोमि. ४ व्यं; स्वान्. ५ प्रष्टुमभ्यागतः. ६ घ्न पापचारिन्.

सोपि तदाकर्ण्य व्यचिन्तयत् । अहो आत्मसंतुष्टो जीवलोको यदेषा क्षुद्रचटकात्मानं बहु मन्यते । युक्तं चैतत् ।

स्वचित्तकल्पितो गर्वः कस्य नाम न विद्यते ।
उत्क्षिप्य टिट्टिभः पादौ शेते भङ्गभयाद्दिवः ॥ ९६ ॥

एवं विचिन्त्य तामाह—

सूचीमुखि दुराचारे रण्डे पण्डितमानिनि ।
तूष्णीं भव करिष्यामि नो चेत्त्वां निर्गृहीमहम् ॥ ९७ ॥

एवं तेन निषिद्धापि यदा पुनराश्रयकरणोपदेशेन तमुद्वेजयति तदासौ तं वृक्षमारुह्य तस्याः कुलायं खण्डशः कृत्वा बभञ्ज । अतोहं ब्रवीमि उपदेशो न दातव्य इति । तच्छ्रुत्वा मकर आह—भो मित्र सापराधस्यापि मे कथय पूर्वस्नेहात् । वानर आह नाहं कथयिष्यामि यतस्त्वयाहं भार्यावाक्येन समुद्रे प्रक्षेपणाय नीतः । तदेतन्न युक्तम् । यद्यपि भार्या सर्वलोकादपि वल्लभा भवति तथापि न मित्रबान्धवादयो भार्यावाक्येन समुद्रे प्रक्षिप्यन्ते । तद् धिङ् मूर्ख यत्वया स्त्रियोर्थमेतत्कार्यमनुष्ठातुमारब्धम् ।

न हि स्त्रीणां कथंचिद्विश्वासमुपगच्छेत् ।
यदर्थं स्वकुलं त्यक्तं जीवितार्धं च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥ ९८ ॥

मकर—आह कथमेतत् । सोब्रवीत् ।

कथा १३ ।

अस्ति कस्मिंश्चिदधिष्ठाने कोपि ब्राह्मणः । तस्य च प्रियातिप्राणप्रिया । सापि कुटुम्बेन सह प्रतिदिनं कलहं कुर्वाणा न क्षणमपि विश्राम्यति । सोपि ब्राह्मणः कलहमसहमानो भार्यावाल्लभ्यात्स्वकुटुम्बं परित्यज्य ब्राह्मण्या सह विप्रकृष्टदेशान्तरं गतः । अथ महाटवीमध्ये ब्राह्मण्याभिहितम् । आर्यपुत्र तृषा मां बाधते । तदुदकं कुतोप्यानय । अथासौ तद्वचनानन्तरं यावदुदकं गृहीत्वागच्छति तावत्तां मृतामपश्यत् । अतिवल्लभतया विषादं कुर्वन्यावद्विलपति तावदाकाशे वाचं शृणोति । यदि भो ब्राह्मण त्वं स्वजीवितस्यार्धं ददासि ते जीवति ब्राह्मणी । तच्छ्रुत्वा ब्राह्मणेन शु-

---

सूचीव भेदकत्वान्मुखं यस्याः । वाल्लभ्यात्स्नेहात् । अन्यो देशो देशान्तरं विप्रकृष्टं दे० विप्र० ।

---

१ टिट्टिभी. २ अशक्तोहं गृहारम्भे शक्तोहं गृहभञ्जने । इ. पा. ३ पूर्वस्नेहमनुस्मृत्य हितोपदेशं देहि । ४ भवता. ५ प्रक्षेप्तुम्. ६ मित्राणि बान्धवाश्च. ७ तन्मूर्खो मूढचेतनो यत्. ८ भार्या प्राणेभ्योप्यतिप्रियासीत्. ९ कृष्टं. १० क्वाप्यन्वेषय.

चीभूय तिसृभिर्वाचाभिः स्वजीवितार्धं दत्तम् । वाक्यसममेव जीविता सा ब्राह्मणी । अथ तौ जलं पीत्वा वनफलानि भक्षयित्वा गन्तुमारब्धौ । ततः क्रमेण कस्यचिन्नगरस्य प्रवेशे पुष्पवाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान् । भद्रे यावदहं भोजनं गृहीत्वा समागच्छामि तावत्त्वयात्र स्थातव्यम् । इत्यभिधाय ब्राह्मणो नगरमध्ये जगाम । अथ तस्यां पुष्पवाटिकायां पङ्गुररघट्टं खेलयमानो दिव्यगिरा गीतमुद्गिरति । तच्च श्रुत्वा कुसुमेषुणाभिहतया तया तत्सकाशं गत्वाभिहितम् । भद्र यदि मां न कामयसे तन्मदीया स्त्रीहत्या तव । पङ्गुरब्रवीत्—किं व्याधिग्रस्तेन मया करिष्यसि । साब्रवीत् किमनेनोक्तेन । अवश्यं त्वया सह मया संगमः कर्तव्यः । तच्छ्रुत्वा तथा कृतवान् । सुरतानन्तरं साब्रवीत्—इतः प्रभृति यावज्जीवं मयात्मा भवते दत्तः । इति ज्ञात्वा भवानप्यावाभ्यां सहागच्छतु । सोऽब्रवीत्—एवमस्तु । अथ ब्राह्मणो भोजनं गृहीत्वा समागत्य तया सह भोक्तुमारब्धः । साब्रवीत्—एष पङ्गुर्बुभुक्षितः । तदेतस्यापि कियन्तमपि ग्रासं देहीति । तथानुष्ठिते ब्राह्मण्याभिहितम्—भो विप्र सहायहीनस्त्वम् । यदा ग्रामान्तरं गच्छसि तदा मम वचनसहायोऽपि नास्ति । तत एनं पङ्गुं गृहीत्वा गच्छावः । सोऽब्रवीत् । त्वं न शक्नोष्यात्मानमात्मना वोढुं किं पुनरिमं पङ्गुम् । सा प्राह—पेटाभ्यन्तरस्थमेनमहं नेष्यामि । अथ तत्कृतकवचनव्यामोहितचित्तेन तेनापि प्रतिपन्नम् । तथानुष्ठिते चान्यस्मिन्दिने कूपोपकण्ठे विश्रान्तो ब्राह्मणस्तया पङ्गुपुरुषासक्तया संप्रेर्य कूपान्तःपातितः । सापि पङ्गुं गृहीत्वा कस्मिंश्चिन्नगरे प्रविष्टा । तत्र च शुल्कचौर्यरक्षानिमित्तं राजपुरुषैरितस्ततो भ्रमद्भिस्तन्मस्तकस्था पेटा दृष्टा बलादाच्छिद्य राज्ञोऽग्रे नीता । राजा यावत्तामुद्घाटयति तावत्पङ्गुं ददर्श । ततः सा ब्राह्मणी विलापान्कुर्वती राजपुरुषानुपदमेव तत्रागता राज्ञा पृष्टा को वृत्तान्त इति । साब्रवीत्—ममैष भर्ता व्याधिग्रस्तो दायादसमूहैरुद्वेजितो मया स्नेहव्याकुलितमनसा शिरसि कृत्वा त्वत्सकाशमानीतः । एतच्छ्रुत्वा राजाब्रवीत्-ममैं त्वं भगिनी । ग्रामद्वयं गृहीत्वा

कुसुमेषुणा कामेन। कृतकं कपटयुक्तं वचनं तेन व्यामोहितं विवेकासमर्थं चित्तं यस्य। प्रतिपन्नमङ्गीकृतम् । पङ्गुश्चासौ पुरुषश्च तस्मिन्नासक्तया । संप्रेर्य प्रक्षिप्य । शुल्कं घट्टादौ देयं (जकात इति प्राकृते) तस्य चौर्यं परिहरणं तस्माद्रक्षा तन्निमित्तम् । स्नेहेन व्याकुलितं मनो यस्याः ।

---

१ प्रदेशे. २ ग्रामं गतः. ३ णार्दितया ब्राह्मण्या. ४ यर्हि. ५ मत्सक्ता...तव भविष्यति. ६ ब्राह्मण. ७ स्थां पेटां दृष्ट्वा. ८ व्याकुलचित्तया. ९ भवदीयनगरे. १० यत्, ब्राह्मणि.

भर्त्रा सह भोगान्भुञ्जाना सुखेन तिष्ठ। अथ स ब्राह्मणो दैववशात्केनापि साधुना कूपादुत्तारितः परिभ्रमंस्तदेव नगरमायातः। तया दुष्टभार्यया दृष्टो राज्ञे निवेदितः। राजन् अयं मद्भर्तुर्वैरी समायातः। राज्ञापि वधार्थं समादिष्टः। सोऽब्रवीत् देव अनया मम सक्तं किंचिद्गृहीतमस्ति। ततो यदि त्वं धर्मवत्सलस्ततो दापय। राजाब्रवीत्—भद्रे त्वयास्य सक्तं किंचिद्गृहीतमस्ति तत्समर्पय। सा प्राह देव मया न किंचिद्गृहीतम्। ब्राह्मण आह—यन्मया त्रिवाचिकं स्वजीवितार्धं तव दत्तं तद्देहि मे। अथ सा राजभयात्तत्रैव त्रिवाचिकमेव जीवितं मया दत्तमिति जल्पन्ती प्राणैर्विमुक्ता। ततः सविस्मयं राजाब्रवीत्—किमेतदिति। ब्राह्मणेनापि सकलोऽपि पूर्ववृत्तान्तस्तस्मै निवेदितः। अतोऽहं ब्रवीमि यदर्थं स्वकुलं त्यक्तं इति। वानरः पुनराह—साधु चेदमुपाख्यानकं श्रूयते—

न किं दद्यान्न किं कुर्यात्स्त्रीभिरभ्यर्थितो नरः।
अनश्वा यत्र ह्रेषन्ते शिरः पर्वणि मुण्डितम् ॥ ९९ ॥

मकर आह—कथमेतत्। वानरः कथयति—

कथा १४।

अस्ति प्रख्यातबलपौरुषोऽनेकनरेन्द्रमुकुटमरीचिजालजटिलीकृतपादपीठः शरच्छशाङ्ककिरणनिर्मलयशाः समुद्रपर्यन्तायाः पृथिव्या भर्ता नन्दो नाम राजा। तस्य सर्वशास्त्राधिगतसमस्ततत्त्वः सचिवो वररुचिर्नाम। तस्य च प्रणयकलहेन जाया कुपिता। सा चातीववल्लभानेकप्रकारं परितोष्यमाणापि न प्रसीदति। ब्रवीति च भर्ता—भद्रे येन प्रकारेण तुष्यसि तं वद। निश्चितं करोमि। ततः कथंचित्तयोक्तम्—यदि शिरो मुण्डयित्वा मम पादयोर्निपतसि तदा प्रसादाभिमुखी भवामि। तथानुष्ठिते प्रसन्नासीत्। अथ नन्दस्य भार्यापि तथैव रुष्टा प्रसाद्यमानापि न तुष्यति। तेनोक्तम्—भद्रे त्वया विना मुहूर्तमपि न जीवामि। पादयोः पतित्वा त्वां प्रसादयामि। साब्रवीत्—यदि खलीनं मुखे प्रक्षिप्याहं तव पृष्ठे समारुह्य त्वां धावयामि। धावितस्तु यद्यश्ववद्ध्रेषसे तदा प्रसन्ना

धर्मवत्सलो धर्मपरायणः। प्रख्यातं बलं पौरुषं च यस्य। अनेके च ते नरेन्द्राश्च ०न्द्राः तेषां मुकुटानां मरीचयः किरणास्तेषां जालेन जटिलीकृतं पादपीठं यस्य। शरदि यः शशाङ्कश्चन्द्रस्तस्य किरणा इव निर्मलं यशो यस्य। समुद्रः पर्यन्तः सीमा यस्याः तस्याः। सर्वाणि च तानि शास्त्राणि सर्वशा० तेषामधिगतानि सर्वतत्त्वानि येन। अधिगतसर्वशास्त्रसमस्ततत्व इत्येव साधीयः। खलीनः कविका।

---

१ वधः, वध्यः. २ हेष. ३ नरेन्द्रवृन्द. ४ प्रससादासौ. ५ लोहबन्धनं. ६वद् हे.

भवामि। राज्ञापि तथैवानुष्ठितम्। अथ प्रभातसमये सभायांमुपविष्टस्य राज्ञः समीपे वररुचिरायातः। तं च दृष्ट्वा राजा पप्रच्छ—भो वररुचे किंपर्वणि मुण्डितं शिरस्त्वया। सोऽब्रवीत्—न किं दद्यान्न किं कुर्यात् इति। तद्भो दुष्टमकर त्वमपि नन्दवररुचिवत्स्त्रीवश्यः।

अथ तच्छ्रुत्वा मकर आह। भो वयस्य मे कृतद्रोहबुद्धेः परमकृपया ममोपरि प्रसादं कृत्वा शोभनोपायः कथ्यतां येनोपायेन सुखेन गृहं प्राप्नोमि। तच्छ्रुत्वा कपिराह। भो दुर्बुद्धे भवान्कथितमपि न संविधास्यति। यथा।

सतां वचनमादिष्टं यो मोहादवमन्यते।
सै एव नाशमाप्नोति सिंहाद्दासेरको यथा॥ १००॥

मकर आह। कथमेतत्। सोऽब्रवीत्।

कथा १५.

अस्ति कस्मिंश्चिदधिष्ठाने मन्दमतिनामा रथकारः प्रतिवसति स्म। तेन स्वकर्मानभिज्ञेनोष्ट्री गृहीता। तस्याः खादनपानादिकं कुर्वन्कालं नयति। ततो महतोष्ट्रेण संगमो जातः। सा गर्भं दधार। अथ प्रसवसमये प्रसूता। दासेरको जातः। अथ नगरनिकटवाटिकायां धवखदिरपलाशाम्रजम्बून्यग्रोधादीनां पल्लवभक्षणादहर्निशं पीवरतनुरुष्ट्री संजाता। सोपि दासेरको मह नुष्ट्रः संजातः। ततः स नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति। रथकारेण वल्लभत्वाद्दासेरकग्रीवायां घण्टा बद्धा। पश्चाद्रथकारो व्यचिन्तयत्-अहो किमन्यैर्दुष्कृतकर्मभिः। यदेतस्मादेवोष्ट्रीप-

---

दासेरक उष्ट्रः। वाटिका उपवनम्। दुष्कराणि आयाससाध्यानि कर्माणि तैः।

---

१ सभा०. २ मोहान्न कुरुते ध्रुवम्; मदेन न करोति यः ३ स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरम्; स करटवदुर्बुद्धिर्वेलातिक्रमणे मृतः ४ उज्ज्वलको नाम. ५ स चातीव दारिद्र्योपहतश्चिन्तितवान्—'अहो धिगियं दरिद्रतास्मद्गृहे। यतः सर्वोऽपि जनः स्वकर्मणैव रतस्तिष्ठति। अस्मदीयः पुनर्व्यापारो नात्राधिष्ठानेऽर्हति। यतः सर्वलोकानां चिरंतनाश्चतुर्भूमिका गृहाः सन्ति। मम च नात्र। तत्किं मदीयेन रथकारत्वेन प्रयोजनम्। इति चिन्तयित्वा देशान्निष्क्रान्तः। यावत्किंचिद्वनं गच्छति तावद्गह्वराकारवनगहनमध्ये सूर्यास्तमनवेलायां स्वयूथाद्भ्रष्टां प्रसववेदनया पीड्यमानामुष्ट्रीमपश्यत्। स च दासेरकयुक्तामुष्ट्रीं गृहीत्वा स्वस्थानाभिमुखः प्रास्थितः। गृहमासाद्य रज्जुं गृहीत्वा तामुष्ट्रिकां बबन्ध। ततश्च तीक्ष्णं परशुमादाय तस्याः कृते पल्लवानयनार्थं पर्वतैकदेशे गतः। तत्र च नूतनानि कोमलानि बहूनि पल्लवानि छित्त्वा शिरसि समारोप्य तस्याग्रे निचिक्षेप। तया च तानि शनैः शनैर्भक्षितानि। पश्चात्पल्लवभक्षणप्रभावादहर्निशं. ६ नीत्वा. ७ एतदेवो०नमस्य... भरणपोषणे भव्यं.

रिपालनादस्य कुटुम्बस्य भव्यं संजातम् । तत्किमन्येन व्यापारेण । तत एतस्या उपरि द्रम्मा गृह्यन्ते । एवं विचिन्त्य गृहमागत्य प्रियामाह । भद्रे, समीचीनोऽयं व्यापारः । मयास्या उष्ट्र्या उपरि बहवो द्रम्मा ग्रहीतव्याः। तव संमतिश्चेत्कुतोऽपि धनिकात्किंचिद्द्रव्यमादाय मया गुर्जरदेशे गन्तव्यं कलभग्रहणाय। तावत्त्वयैतौ यत्नेन रक्षणीयौ यावदहमपरामुष्ट्रीं गृहीत्वा समागच्छामि । ततश्च गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः। किं बहुना । तेन तथा कृतं तथा तस्य प्रचुरा उष्ट्राः करभाश्च संमिलिताः। अथ तेन महद्यूथं कृत्वा रक्षापुरुषाणां प्रतिवर्षं करभमेकं च निवेद्याहर्निशं दुग्धपानमादिष्टम् । एवं स रथकारो नित्यमेवोष्ट्र्व्यापारं कुर्वन्सुखेन तिष्ठति। अथ ते दासेरका अधिष्ठानोपवन आहारार्थं गच्छन्ति। कोमलवल्लीर्भक्षयित्वा महासरसि पानीयं पीत्वा च सायंसमये सर्वे मन्दं मन्दं लीलया गृहमागच्छन्ति। स च पूर्वदासेरको मदातिरेकात्पृष्ठ आगत्य मिलति। ततस्तैरभिहितम्। अहो मन्दमतिरयं दासेरको यूथाद्भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन्नागच्छति। यदि कस्यापि दुष्टसत्त्वस्य संदर्शे पतिष्यति तन्नूनं मरिष्यति। अथ तेषां तद्वनं गाहमानानां कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः। यावदवलोकयति तावदुष्ट्रीदासेरकाणां यूथं गच्छति। एकस्तु पृष्ठे क्रीडां कुर्वन्वल्लीं चरन्यावद्गच्छति तावदन्ये दासेरकाः पानीयं पीत्वा स्वगृहे गताः। सोऽपि वनान्निष्क्रम्य यावद्दिशोऽवलोकयति तावन्न कथंचिन्मार्गं वेत्ति[10]। यूथाद्भ्रष्टो महाशब्दं कुर्वन्मन्दं मन्दं यावत्किंचिद्दूरं गच्छति तावच्छब्दानुसारेण सज्जितक्रमो भूत्वा सिंहोऽग्रे स्थितः। यावदुष्ट्रः समीपमागतस्तावत्सिंहेनोल्लिलित्वा ग्रीवायां गृहीत्वा मारितः। अतोऽहं ब्रवीमि। सतां वचनमादिष्टम् इति। अथ तच्छ्रुत्वा मकर आह। भद्र

प्राहुः साप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥ १०१ ॥
उपदेशप्रदातॄणां नराणां हितमिच्छताम्।
इह लोके परत्रे च व्यसनं नोपपद्यते ॥ १०२ ॥

भव्यं कल्याणम् । संदर्शे० दृग्गोचरो भवति । उल्लिलित्वा आक्रम्य । अपप्रयोग एषः ।

---

१ ततश्च द्रम्मानादाय गुर्जराग्रामे गत्वा करभाः संक्रीताः। २ पुरुषो धृतः। तस्य वर्षं प्रति वृत्या करभमेकं प्रयच्छति। अन्यच्चाहर्निशं दुग्धपानं तस्य निरूपितम्। ३ उष्ट्रीकरभ. ४ वल्लीर्यथेच्छया. ५ तैः कलभैः. ६ यथा यू० ७ सुखे. ८ मृत्युमवाप्स्यति. ९ चिरात्. १० पश्यति वेत्ति च. ११ मन्दं मन्दं बृहच्छब्दं. १२ सारी सिंहोऽपि क्रमं कृत्वा निभृतोऽग्रे. १३ लम्फयित्वा. १४ देशोऽप.

तत्सर्वथा कृतघ्नस्यापि मे कुरु प्रसादमुपदेशप्रदानेन ।

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ १०३ ॥

तदाकर्ण्य वानर आह । भद्र यद्येवं तद्गत्वा तेन सह युद्धं कुरु ।

हतस्त्वं प्राप्स्यसि स्वर्गं जीवन्गृहमथोपि वा ।
युध्यमानस्य ते भावि गुणद्वयमनुत्तमम् ॥ १०४ ॥

उक्तं च यतः—

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समं तुल्यपराक्रमैः ॥ १०५ ॥

मकर आह । कथमेतत् । सोऽब्रवीत् ।

कथा १६.

अस्ति कस्मिंश्चिद्वनोद्देशे महाचतुरको नाम शृगालः । तेन कदाचिदरण्ये स्वयं मृतो गजः समासादितः । तस्य समन्ताद्भ्रमति परं कठिनां त्वचं भेत्तुं न शक्नोति । अत्रान्तरे भ्रमंस्तत्र देशे कश्चित्सिंहः समायातः । तं दृष्ट्वा स क्षितितलविन्यस्तमौलिः संयोजितकरयुगलः प्रोवाच । स्वामिन् त्वदीयोहं लाकुटिकस्त्वदर्थे गजमिमं रक्षामि । तदेनं भक्षयतु स्वामी । तं दृष्ट्वा सिंह आह । भो नाहमन्यहतं सत्त्वं कदाचिद्भक्षयामि । तन्मया प्रसादीकृत एष ते गजः । तच्छ्रुत्वा शृगालः सानन्दमाह । युक्तमिदं स्वामिनो निजभृत्येषु । उक्तं च ।

अन्त्यावस्थोपि महान्स्वामिगुणान्न जहाति तु शुद्धतया ।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोपि ॥ १०६ ॥

तदाकर्ण्य सिंहो गतः । अथ तस्मिन्गते कश्चिद्व्याघ्रः समायातः । तमपि दृष्ट्वाऽसौ व्यचिन्तयत् । एकस्तावद्दुरात्मा प्रणिपातेनापवाहितः । तत्कथमिदानीमेनमतिवाहयिष्यामि । नूनं शूरोयं न खलु भेदं विना साध्यो भविष्यति । उक्तं च ।

अनुत्तममुत्कृष्टम् । क्षितितले निहितः मौलिर्येन । लकुटं यष्टिं गृह्णातीति लाकुटिकः । शिखिभुक्तः अग्निदग्धः । आदौ शि० पश्चान्मुक्तः शि० क्तः ।

---

१ तर्हि तत्र गत्वा. २ कठिनत्वात्. ३ अथात्रावसर इतश्चेतश्च विचरन् कश्चित्सिंहस्तत्र प्रदेशे समाययौ । अथ सिंहं समागतं. ४ मिलत्;—लिमण्डलः;—मौलिः प्रणम्य प्रोवाच. ५ अथ सिंहः । तं प्रणतं इ. च. पा. ६ अस्मादनन्तरम्—वनेपि सिंहा मृगमांसभक्ष्या बुभुक्षिता नैव तृणं चरन्ति । एवं कुलीना व्यसनाभिभूता न नीतिमार्गं परिलंघयन्ति । इत्याधिकं पु० रे. ७ तत्तवैव गजोयं मया. ८ एको दु० सिंहस्तावत्. ९ तदस्य कथमतिवाहनं भविष्यति.

न यत्र शक्यते कर्तुं साम दानमथापि वा ।
भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः ॥ १०७ ॥

किंच सर्वगुणसंपन्नोपि भेदेन बध्यते । उक्तं च ।

अत्यच्छेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संप्राप्तं मौक्तिकेनापि बन्धनम् ॥ १०८ ॥

एवं संप्रधार्य तस्याभिमुखो भूत्वेषदुन्नतकंधरः ससंभ्रममुवाच । माम कथं भवानत्र मृत्युमुखे प्रविष्टः । एष गजः सांप्रतं सिंहेन व्यापादितः । स च मां रक्षपालं निधाय स्नानार्थं गतः । तेन च गच्छता मम समादिष्टम्-यदि कश्चिदिह व्याघ्रः समागच्छति तन्मम सुगुप्तं निवेदनीयं येन वनमिदं मया निर्व्याघ्रं कर्तव्यम् । यतः पूर्वं व्याघ्रेणैकेन मया हतो गजः शून्ये भक्षयित्वोच्छिष्टतां नीतः । तद्दिनादारभ्य व्याघ्रान्प्रति कुपितोस्मि। तच्छ्रुत्वा व्याघ्रः संत्रस्तस्तमाह। भो भगिनीसुत देहि मे प्राणदक्षिणाम्। त्वया तस्यात्र चिरायागतस्य मदीया कापि वार्ता नाख्येया । एवमुक्त्वा सत्वरं प्रनष्टः । अथ तस्मिन्गते तत्र कश्चिद्द्वीपी समायातः । तमपि दृष्ट्वा व्यचिन्तयत्-दृढदंष्ट्रोयम् । तदस्य पार्श्वाद्गजचर्मच्छेदं कारयामि । एवं निश्चित्य तमुवाच । भो भगिनीसुत किमिति चिराद्दृष्टोसि कथं च बुभुक्षित इव लक्ष्यसे । तदतिथिरसि मे । एष गजः सिंहेन हतस्तिष्ठति । अहं चास्य तदादिष्टो रक्षपालः । अतो वदामि । यावत्सिंहो न समायाति तावदस्य गजस्य मांसं भक्षयित्वा तृप्तिं कृत्वा व्रज । स आह । माम यद्येवं तन्न कार्यं मे मांसाशनेन । यतो जीवन्नरो भद्रशतानि पश्यति । उक्तं च ।

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ १०९ ॥

तदहमितोपयास्यामि । शृगाल आह । भो अधीर विश्रब्धो भूत्वा भक्षय त्वम् । तस्यागमनं दूरतोहं ते निवेदयिष्यामि । अथ द्वीपिना तथानुष्ठिते चर्मभेदं जातं विज्ञाय तेनाभिहितम् । भो भगिनीसुत गम्यतां गम्यताम । एष सिंहः समायाति । तच्छ्रुत्वा चित्रकोपि दूरं प्रनष्टः । अथ यावदसौ तत्कृतद्वारेण किंचिन्मांसं भक्षयति तावदपरः शृगालः संक्रुद्धः समायातः । तमात्मतुल्यपराक्रमं दृष्ट्वेमं श्लोकमपठत् ।

अत्यच्छेन अतिधवलेन अतिशुद्धेन च । अविरुद्धेन अविद्धेन अनुकूलेन च । सुवृत्तेन सुवर्तुलेन शोभनाचरणेन च । अन्तर्भिन्नेन कृतच्छिद्रेण नष्टचित्तैकाग्र्येण च । मौक्तिकेन मुक्ताफलेन मुक्तिं वाञ्छता पुरुषेण च । द्वीपी चित्रकः । आत्मना तुल्यः पराक्रमः यस्य तस्याभिमुखं कृतं प्रयाणं येन ।

---

१ अस्तःस्थेन. २ गर्वादु०. ३ एतद्रक्षणे नियुज्य नद्यां. ४ भयत्रस्तमनाः स आह. ५ किंवदन्ती. ६ अयं चित्रकः. ७ दरात्. ८ अपरं बुभुक्षितः समागतस्त्वमतिथिश्च. ९ जम्बुकेन.

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥ ११० ॥

ततस्तदभिमुखकृतप्रयाणस्तं जित्वा स्वदंष्ट्राभिर्विदार्य दिशोभाजं कृत्वा स्वयं सुखेन चिरकालं तन्मांसं बुभुजे । एवं त्वमपि तं रिपुं स्वजातीयं युद्धेन परिभूय दिशोभाजं कुरु । नो चेत्पश्चाद्बद्धमूलादस्मात्त्वमपि विनाशमवाप्स्यसि । उक्तं च यतः ।

संभाव्यं गोषु संपन्नं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥ १११ ॥

तथा च ।

सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११२ ॥

मकर आह । कथमेतत् । सोऽब्रवीत् ।

कथा १७ ।

अस्ति कस्मिंश्चिदधिष्ठाने चित्राङ्गो नाम सारमेयः । एकदा तत्र चिरकालं दुर्भिक्षं पतितम् । अन्नाभावात्सारमेयादयो निष्कुलतां गन्तुमारब्धाः । अत्रान्तरे स चित्राङ्गः क्षुत्क्षामकण्ठः सुभिक्षं श्रुत्वान्यदेशं गतः । तत्र च कस्मिंश्चित्पुरे कस्यश्चिद्गृहमेधिनः शिथिलगृहिणीप्रसादेन तृप्तिं गच्छति । परं बहिर्निर्गतोऽन्यैः सारमेयैश्चतुर्दिशं दंष्ट्राभिर्विदार्यते । ततस्तेन विचिन्तितम् । अहो वरं स्वदेशो यत्र दुर्भिक्षेऽपि सुखेन स्थीयते । न कोऽपि युद्धं करोति । तत्स्वदेशं गच्छामि । इत्यवधार्य स्वस्थानं प्रति जगाम । अथासौ देशान्तरात्समायातः सर्वैरपि स्वजनैः पृष्टः—भोश्चित्राङ्ग कथयास्माकं देशान्तरवार्ताम् । कीदृग्देशः । किंचेष्टितो लोकः । क आहारः । कश्च व्यवहारस्तत्र इति । स आह । किं कथ्यते देशस्य विषये ।

सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११३ ॥

सोऽपि मकरस्तदुपदेशं श्रुत्वा मरणे कृतनिश्चयो वानरमनुज्ञाप्य स्वाश्र-

---

सारमेयः—सरमाया अपत्यं पुमान् । शिथिला चासौ गृहिणी च तस्या प्रसादेन ।

---

१ सुभिक्षाणि. २ पौरयो. ३ महद्दुर्भिक्षमभवत् । ४ अन्नाभावेन सकलापि सारमेयजातिर्निष्कुलतां गच्छति । ५ तद्भयाद्देशान्तरं गतः. ६ प्रमादेन प्रतिदिनं गृहं प्रविश्य विविधान्नानि भक्षयन्परां तृप्तिं गच्छति. ७ मदोद्धतसारमेयैः सर्वदिक्षु परिवृत्य सर्वाङ्गं. ८ स्वनगरं. ९ तथाकरोत्. १० विहारः. ११ विदेशस्य स्वरूपविषयः १२ कृतमर०.

यं गतः । तत्र च तेन स्वगृहप्रविष्टेनाततायिना सह विग्रहं कृत्वा दृढसत्वावष्टम्भनाच्च तं व्यापाद्य स्वाश्रयं सुखेन च लब्ध्वा चिरकालमतिष्ठत् । अथवा साध्विदमुच्यते ।

अकृत्वा पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवोपि चाश्नाति दैवादुपगतं तृणम् ॥ १४ ॥

इति । समाप्तं चेदं लब्धप्रणाशं नाम चतुर्थं तन्त्रम् ॥

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके चतुर्थं तन्त्रं समाप्तम् ।

कथा ८ पृ० २०. अस्याः पूर्वभागः पुस्तकान्तरे उपलब्धो यथा—

अस्ति विषमशिलातलस्खलिताम्बुनिर्घोषश्रवणसंत्रस्तमत्स्यपरिवर्तनसंजनितश्वेतफेनशबलतरङ्गाया गङ्गायास्तटे जपनियमतपःस्वाध्यायोपवासयोगक्रियानुष्ठानपरायणैः परिपूतपरिमितजलजिघृक्षुभिः कन्दमूलफलशैवलाभ्यवहारकदर्थितशरीरैर्वल्कलकृतकौपीनमात्रप्रच्छादनैस्तपस्विभिराकीर्णमाश्रमपदम् । तत्र याज्ञवल्क्यो नाम कुलपतिरासीत् । तस्य जाह्नव्यां स्नात्वोपस्प्रष्टुमारब्धस्य करतले श्येनमुखात्परिभ्रष्टा मूषिका पतिता । तां दृष्ट्वा न्यग्रोधपत्रेऽवस्थाप्य पुनः स्नात्वोपस्पृश्य च प्रायश्चित्तादिक्रियां कृत्वा च मूषिकां तां स्वतपोबलेन कन्यकां कृत्वा समादाय स्वाश्रममानिनाय । अनपत्यां च जायामाह—भद्रे गृह्यतामियं तव दुहितोत्पन्ना । प्रयत्नेन संवर्धनीया इति । ततस्तया संवर्धिता लालिता पालिता च यावद्द्वादशवर्षा संजज्ञे । अथ विवाहयोग्यां तां दृष्ट्वा भर्तारमेवं जायोवाच—भो भर्तः किमिदं नावबुध्यसे यथास्याः स्वदुहितुर्विवाहसमयातिक्रमो भवति । असावाह—प्रिये साधूक्तम् । उक्तं च—

आततं यथा तथा अयितुं शीलं यस्य । अत्र स्थानहरस्तेन । तदुक्तं—अग्निदो गरदश्चैव शस्त्रपाती धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥ इति । दृढं च तत्सत्त्वं मनोधैर्यं च तस्यावष्टम्भनमालम्बनं तस्मात् । जरन् चासौ गौश्च । विषमा याः शिलास्तासां तलेषु स्खलितं च तदम्बु च ०म्बु तस्य निर्घोषस्तस्य श्रवणं तेन संत्रस्ता ये मत्स्यास्तेषां परिवर्तनेन संजनितो य श्वेतः फेनस्तेन शबलाः तरङ्गा यस्याः । परिपूतं च तन्मितं च जलं तद् ग्रहीतुमिच्छुभिः । –शैवलानामभ्यवहारोशनं तेन कदर्थितानि शरीराणि यैः । वल्कलैः कृतानि कौपीनान्येव ०मात्रं प्रच्छादनं येषां तैः । कुलपतिः—मुनीनां दश साहस्रं योन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

---

१ तयालस्यभो. २ कुरंगोपि सम०, ३ योग. ४ तस्य तावत. ५ आशु शिश्रिये ।

स्त्रियः पूर्वं सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
भुञ्जते मानुषाः पश्चात्तस्माद्दोषो न विद्यते॥ ५६॥
सोमस्तासां ददौ शौचं गन्धर्वाः शिक्षितां गिरम्।
पावकः सर्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः॥ ५७॥
असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जना भवेत्कन्या कुचहीना च नग्निका॥ ५८॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकाम्।
पयोधराभ्यां गन्धर्वा रजस्यग्निः प्रतिष्ठितः॥ ५९॥
तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत्।
विवाहश्चाष्टवर्षायाः कन्यायास्तु प्रशस्यते॥ ६०॥
व्यञ्जनं हन्ति वै पूर्वं परं चैव पयोधरौ।
रैतिरिष्टांस्तथा लोकान्हन्याच्च पितरं रजः॥ ६१॥
ऋतुमत्यां तु तिष्ठन्त्यां स्वेच्छादानं विधीयते।
तस्मादुद्वाहयेन्नग्नां मनुः स्वायंभुवोऽब्रवीत्॥ ६२॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता।
अविवाह्या तु सा कन्या जघन्या वृषली स्मृता॥ ६३॥
श्रेष्ठेभ्यः सदृशेभ्यश्च जघन्येभ्यो रजस्वला।
पित्रा देया विनिश्चित्य यतो दोषो न विद्यते॥ ६४॥

अतोऽहमेनां सदृशाय प्रयच्छामि नान्यस्मै। उक्तं च—

ययोरेव समं वित्तं ययोरेव समं कुलम्।
तयोर्विवाहः सख्यं च न तु पुष्टविपुष्टयोः॥ ६५॥

तथा च। कुलं च शीलं च इ०।

शौचं शुचिताम्। मेध्यत्वं पूतत्वम्। अव्यञ्जना तारुण्यचिह्नरहिता।

१ धरेषु. २ गति.

अथापरीक्षितकारकम् ।

अथेदमारभ्यते अपरीक्षितकारकं नाम पञ्चमं तन्त्रं यस्यायमादिमः श्लोकः ।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम् ॥ १ ॥

तद्यथानुश्रूयते । अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् । तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म । तस्य च धर्मार्थकामकर्माणि कुर्वतो विधिवशाद्धनक्षयः संजातः । ततो विभवक्षयादपमानपरंपरया परं विषादं गतः । अथान्यदा रात्रौ सुप्तश्चिन्तितवान् । अहो धिगियं दरिद्रता । उक्तं च ।

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म ।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य ॥ २ ॥

मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा ।
सर्वं प्रणश्यति समं वित्तविहीनो यदा पुरुषः ॥ ३ ॥

प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः ।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ॥ ४ ॥

नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य ।
घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया सततम् ॥ ५ ॥

गगनमिव नष्टतारं शुष्कं सरः श्मशानमिव रौद्रम् ।
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥ ६ ॥

न विभाव्यन्ते लघवो वित्तविहीनाः पुरोपि निवसन्तः ।
सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥ ७ ॥

सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेपि ।
आढ्ये कल्पतराविव नित्यं रज्यन्ति जननिवहाः ॥ ८ ॥

अपरीक्षितस्य कारकः स एवाभेदोपचारात्तन्नामकं तन्त्रम् । कुत्सितं यथा स्यात्तथा दृष्टं कुदृष्टम् । विज्ञानं-मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः । इत्यमरः । शिशिरस्य ऋतोः श्रीः शोभा । धनविहीनस्य गृहं नष्टाः तारा यस्मात्तत् नष्टतारं गगनमिव इत्यादि । वित्तविहीना अतो लघवः पुरो निवसन्तोपि न विभाव्यन्ते लक्ष्यन्ते । सुकुलं शोभनं कुलमस्य । आढ्ये श्रीमति ।

---

१ ॰परीक्ष्यकारित्वं. १ मोक्षक॰, मोक्षादिक॰. २ भ्रष्ट॰

विफलमिह पूर्वसुकृतं विद्यावन्तोपि कुलसमुद्भूताः ।
यस्य यदा विभवः स्यात्तस्य तदा दासतां यान्ति ॥ ९ ॥
लघुरयमाह न लोकः कामं गर्जन्तमपि पतिं पयसाम् ।
सर्वमलज्जाकरमिह यत्कुर्वन्तीह परिपूर्णाः ॥ १० ॥

एवं संप्रधार्य भूयोप्यचिन्तयत् । यदहमनशनं कृत्वा प्राणानुत्सृजामि । किमनेन व्यर्थजीवितव्यसनेन । एवं निश्चयं कृत्वा सुप्तः । अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी दर्शनं गत्वा प्रोवाच । भोः श्रेष्ठिन् मा त्वं वैराग्यं गच्छ । अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः । तदनेनैव रूपेण प्रातस्त्वद्गृहमागमिष्यामि । तत्त्वयाहं लकुटप्रहारेण शिरसि ताडनीयो येन कनकमयो भूत्वाक्षयो भवामि । अथ प्रातः प्रबुद्धः सन्स्वप्नं स्मरंश्चिन्ताचक्रमारूढस्तिष्ठति । अहो सत्योयं स्वप्नः किंवासत्यो भविष्यति न ज्ञायते । अथवा नूनं मिथ्या भाव्यं यतोहं केवलं वित्तमेव चिन्तयामि । उक्तं च ।

व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।
कामार्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥ ११ ॥

एतस्मिन्नन्तरे तस्य भार्यया कश्चिन्नापितः पादप्रक्षालनायाहूतः । अत्रान्तरे च यथानिर्दिष्टः क्षपणकः सहसा प्रादुर्बभूव । अथ स तमालोक्य प्रहृष्टमना यथासन्नकाष्ठदण्डेन तं शिरस्यताडयत् । सोपि सुवर्णमयो भूत्वा तत्क्षणाद्भूमौ निपतितः । अथ तं स श्रेष्ठी निभृतं स्वगृहमध्ये कृत्वा नापितं संतोष्य प्रोवाच । यदेतद्धनं वस्त्राणि च मया दत्तानि गृहाण । भद्र पुनः कस्यचिन्नाख्येयो वृत्तान्तः । नापितोपि स्वगृहं गत्वा व्यचिन्तयत् । ननमेते सर्वेपि नग्नकाः शिरसि दण्डहताः काञ्चनमया भवन्ति । तदहमपि प्रातः प्रभूतानाहूय लकुटैः शिरसि हन्मि येन प्रभूतं हाटकं मे भवति । एवं चिन्तयतो महता कष्टेन निशातिचक्राम । अथ प्रभातेभ्युत्थाय बृहल्लकुटमेकं प्रगुणीकृत्य क्षपणकविहारे गत्वा जिनेन्द्रस्य प्रदक्षिणात्रयं विधाय जानुभ्यामवनिं गत्वा वक्त्रद्वारन्यस्तोत्तरीयाञ्चलस्तारस्वरेणेमं श्लोकमपठत् ।

जयन्ति ते जिना येषां केवलज्ञानशालिनाम् ।
आ जन्मनः स्मरोत्पत्तौ मानसेनोषरायितम् ॥ १२ ॥

अन्यच्च ।

लोकः कामं गर्जन्तमपि पयसां पतिं अयं लघुः इति न आह इत्यन्वयः । जीवितव्यसनेन जीवितोत्कटेच्छया । मिथ्या भाव्यमनेन स्वप्नेनेति शेषः । हाटकं सुवर्णं । विहारो मठः । जिनेन्द्रो बुद्धमूर्तिः । ऊषरायितं बीजांकुरोत्पत्त्यभावात् ।

---

१ विकलं, सुरूपतागुणयुक्ताः. २ नो व्य०. ३ रूपेण. ४ भिक्षार्थं स्व०. ५ नख.

सा जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम् ।
तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ १३ ॥

तथा च ॥ ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोसि निर्घृणतरस्त्वत्तः कुतोन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः ॥ १४ ॥

एवं संस्तुत्य ततः प्रधानक्षपणकमासाद्य क्षितिनिहितजानुचरणो नमोस्तु वन्द इत्युच्चार्य लब्धधर्मवृद्ध्याशीर्वादः सुखमालिकानुग्रहलब्धव्रतादेश उत्तरीयनिबद्धग्रन्थिः सप्रश्रयमिदमाह । भगवन्नद्य विहरणक्रिया समस्तमुनिसमेतेनास्मद्गृहे कर्तव्या । स आह । भोः श्रावक धर्मज्ञोपि किमेवं वदसि । किं वयं ब्राह्मणसमाना यत आमन्त्रणं करोषि । वयं सदैव तत्कालपरिचर्यया भ्रमन्तो भक्तिभाजं श्रावकमवलोक्य तस्य गृहे गच्छामस्तेन कृच्छ्रादभ्यर्थिताः । तद्गृहे प्राणधारणमात्रामशनक्रियां कुर्मः । तद्गम्यतां नैवं भूयोपि वाच्यम् । तच्छ्रुत्वा नापित आह । भगवन् वेद्मि अहं युष्मद्धर्मम् । परं भवतो बहुश्रावका आह्वयन्ति । सांप्रतं पुनः पुस्तकाच्छादनयोग्यानि कर्पटानि बहुमूल्यानि प्रगुणीकृतानि तथा पुस्तकानां लेखनाय लेखकानां च वित्तं संचितमास्ते । तत्सर्वथा कालोचितं कार्यम् । ततो नापितोपि स्वगृहं गतः । तत्र च गत्वा खादिरमयं लकुटं सज्जीकृत्य कपाटयुगलं द्वारे समाधाय सार्धप्रहरदिवससमये भूयोपि विहारद्वारमाश्रित्य सर्वान्क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहमानयत् । तेपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान्परित्यज्य प्रहृष्टमनसस्तस्य पृष्ठतो ययुः । अथवा साध्विदमुच्यते ।

एकाकी गृहसंत्यक्तः पाणिपात्रो दिगम्बरः ।
सोपि संवाह्यते लोके तृष्णया पश्य कौतुकम् ॥ १५ ॥

ध्यानेति ध्याननिमिषेण । अनंगः कामस्तस्य शरैः आतुरः पीडितस्तम् । लब्धः धर्मवृद्धिर्भवत्वित्याशीर्वादो येन । सुखमालिकाया अनुग्रहस्तेन लब्धो व्रतादेशो व्रतोपदेशो येन । विहरणं भिक्षार्थं पर्यटनं तस्य क्रिया । गृहं संत्यक्तं येन । संत्यक्तगृहः इत्यर्थः ।

---

१ यच्च निर्मलम् । स एव केवलं श्लाघ्यो यो जिनं पूजयेत्सदा । इ. पा. २ व्रतोप. ३ भगवन्मम भगवता पार्श्वनाथेनादेशः प्रदत्तो यन्मदीयतपस्विनां भक्तिं न करोषि तत्ते कुलक्षयो भविष्यति । ततः प्रातरुत्थाय मया भयभावेनैतत्कृतम् । भगवन्न वेद्मि अहम् । ४ दत्तं. ५ किं बहुना यद्येवं न मन्यसे तदनशनं मे । इत्युक्त्वा दंतकाष्ठं भक्षयित्वा उपविष्टः । ततस्तेन क्षपणकेन प्रतिपन्नं सर्वथा तत्कालो० ६ रैकसः, ०रद्वयोर्देशे.

जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
चक्षुः श्रोत्रे च जीर्येते तृष्णैका तरुणायते ॥ १६ ॥

अपरं गृहमध्ये तान्प्रवेश्य द्वारं निभृतं विधाय लकुटप्रहारैः शिरस्यताडयत्। तेपि ताड्यमाना एके मृता अन्ये भिन्नमस्तकाः फूत्कर्तुमारब्धाः। अत्रान्तरे तमाक्रन्दमाकर्ण्य कोटरक्षपालैरभिहितम्। भो भोः किमयं महान्कोलाहलो नगरमध्ये। तद्गम्यतां गम्यताम्। ते च सर्वे गत्वा यावत्पश्यन्ति तावद्रुधिरप्लावितदेहाः पलायमानाः क्षपणका दृष्टाः। तैः स नापितो बद्धः। हतशेषैः क्षपणकैः सह धर्माधिष्ठानं नीतः। तैर्नापितः पृष्टः। भोः किमेतद्भवता कुकृत्यमनुष्ठितम्। स आह किं करोमि। मया श्रेष्ठिमणिभद्रगृहे दृष्ट एवंविधो व्यतिकरः। सोपि सर्वं मणिभद्रवृत्तान्तं यथादृष्टमकथयत्। ततः श्रेष्ठिनमाहूय भणितवन्तः। भोः श्रेष्ठिन् किं त्वया कश्चित्क्षपणको व्यापादितः। ततस्तेनापि सर्वः क्षपणकवृत्तान्तस्तेषां निवेदितः। अथ तैरभिहितम्। अहो शूलमारोप्यतामसौ दुष्टात्मा कुपरीक्षितकारी नापितः। तथानुष्ठिते तैरभिहितम्।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम्।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम् ॥ १७ ॥

अथवा साध्विदमुच्यते।

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।
पश्चाद्भवति संतापो ब्राह्मण्या नकुले यथा ॥ १८ ॥

मणिभद्र आह। कथमेतत्। ते धर्माधिकारिणः प्रोचुः।

कथा १.

कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या प्रसूता सुतमजनयत्। तस्मिन्नेव दिने नकुली नकुलं प्रसूता। अथ सा सुतवत्सला दारकवत्तमपि नकुलं स्तन्यदानाभ्यङ्गपोषणादिभिः पुपोष। परं तस्य न विश्वसिति यत्कदाचिदेष स्वजातिदोषवशादस्य दारकस्य विरुद्धमाचरिष्यतीति। एवं जानाति स्वचित्ते। उक्तं च।

कुपुत्रोपि भवेत्पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपोपि मूर्खोपि व्यसनी खलः ॥ १९ ॥

जीर्यतो वृद्धभावं गच्छतः। हतेभ्यः शेषैः हतशेषैः। कुदृष्टं न सम्यग्दृष्टम्।

---

१ पंचत्वमुपागताः २ मुपचक्रमिरे. ३ तदादेशकारिणस्तत्सहिता वेगात्तद्गृहं गताः. ४ नग्नकाः. ५ ब्राह्मण्यां नकुलार्थतः. ६ मर्दना.

एवं च भाषते लोकश्चन्दनं किल शीतलम् ।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ॥ २० ॥
सौहृदस्य न वाञ्छन्ति जनकस्य हितस्य च ।
लोकाः प्रपालकस्यापि यथा पुत्रस्य बन्धनम् ॥ २१ ॥

अथ सा कदाचिच्छय्यायां पुत्रं शाययित्वा जलकुम्भमादाय पतिमुवाच ब्राह्मण जलार्थमहं तडागे यास्यामि । त्वया पुत्रोयं नकुलाद्रक्षणीयः। अथ तस्यां गतायां पृष्ठे ब्राह्मणोपि शून्यं गृहं मुक्त्वा भिक्षार्थं क्वचिन्निर्गतः। अत्रान्तरे दैववशात्कृष्णसर्पो बिलान्निष्क्रान्तः । नकुलोपि तं स्वभाववैरिणं मत्वा भ्रातू रक्षणार्थं सर्पेण सह युद्ध्वा सर्पं खण्डशः कृतवान् । ततो रुधिराप्लावितवदनः सानन्दं स्वव्यापारप्रकाशनार्थं मातुः संमुखो गतः । मातापि तं रुधिरक्लिन्नमुखमवलोक्य शङ्कितचित्तावश्यमनेन दुरात्मना दारको भक्षित इति विचिन्त्य कोपात्तस्योपरि तं जलकुम्भं चिक्षेप । एवं सा नकुलं व्यापाद्य यावत्प्रलपन्ती गृह आगच्छति तावत्सुतस्तथैव सुप्तस्तिष्ठति । समीपे कृष्णसर्पं खण्डशः कृतमवलोक्य पुत्रवधशोकेनात्मशिरो वक्षःस्थलं च ताडयितुमारब्धा । अत्रान्तरे ब्राह्मणो गृहीतनिर्वापः समायातो यावत्पश्यति तावत्पुत्रशोकाभितप्ता ब्राह्मणी प्रलपति-भो भो लोभात्मन् लोभाभिभूतेन त्वया न कृतं मद्वचः । तदनुभव सांप्रतं पुत्रमृत्युदुःखवृक्षफलम् । अथवा साध्विदमुच्यते ।

अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत् ।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥ २२ ॥

ब्राह्मण आह । कथमेतत् । सा प्राह ।

कथा २.

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म । ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः । अहो धिगियं दरिद्रता । उक्तं च ।

वरं वनं व्याघ्रगजादिसेवितं जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवितम् ॥२३॥

तथा च ।

बन्धनं स्नेहबन्धम् । रुधिरेणाप्लावितं वदनं यस्य । गृहीतो निर्वापो भिक्षा येन। पुत्रस्य मृत्युः पु० तस्य दुःखं स एव वृक्षस्तस्य फलम् । व्याघ्राश्च गजाश्चादौ येषां ते व्या-दयस्तैः सेवितम् । धनेन हीनः धन० तस्य जीवितम् ।

---

१ सौहृदस्य. २ यदनेन. ३ गणैः समन्वितम्.

स्वामी द्वेष्टि सुसेवितोपि सहसा प्रोज्झन्ति सद्बान्धवा
राजन्ते न गुणास्त्यजन्ति तनुजाः स्फारीभवन्त्यापदः।
भार्या साधुसुवंशजापि भजते नो यान्ति मित्राणि च
न्यायारोपितविक्रमाण्यपि नृणां येषां न हि स्याद्धनम्॥ २४॥

शूरः सुरूपः सुभगश्च वाग्मी शस्त्राणि शास्त्राणि विदांकरोतु।
अर्थं विना नैव यशश्च मानं प्राप्नोति मर्त्योत्र मनुष्यलोके॥ २५॥

तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव।
अर्थोष्मणा विरहितः पुरुषः स एव
बाह्यः क्षणेन भवतीति विचित्रमेतत्॥ २६॥

तद्गच्छामः कुत्रचिदर्थाय। इति संमन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः। अथवा साध्विदमुच्यते।

सत्यं परित्यजति मुञ्चति बन्धुवर्गं
शीघ्रं विहाय जननीमपि जन्मभूमिम्।
संत्यज्य गच्छति विदेशमभीष्टलोकं
चिन्ताकुलीकृतमतिः पुरुषोत्र लोके॥ २७॥

एवं क्रमेण गच्छन्तोवन्तीं प्राप्ताः। तत्र सिप्राजले कृतस्नाना महाकालं प्रणम्य यावन्निर्गच्छन्ति तावद्भैरवानन्दो नाम योगी संमुखो बभूव। ततस्तं ब्राह्मणोचितविधिना संभाव्य तेनैव सह तस्य मठं जग्मुः। अथ तेन ते पृष्टाः। कुतो भवन्तः समायाताः। क्व यास्यथ। किं प्रयोजनम्। ततस्तैरभिहितम्-वयं सिद्धियात्रिकास्तत्र[3] यास्यामो यत्र धनाप्तिर्मृत्युर्वा भविष्यतीत्येष निश्चयः। उक्तं च।

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम्॥ २८॥

तथा च।

पतति कदाचिन्नभसः खाते पातालतोपि जलमेति।
दैवमचिन्त्यं बलवद्बलवान्ननु पुरुषकारोपि॥ २९॥

स्फारीभवन्ति विपुलीभवन्ति। न्याये आरोपिता विक्रमा यैस्तानि मित्राण्यपि यान्ति परित्यज्य गच्छन्ति। न विकलान्यविकलानि अनुपहतानि। बाह्यो त्याज्यः। अभीष्टा लोका यस्मिन्। महाकालः तत्रस्थं शिवलिङ्गम्। ब्राह्मणस्य उचितः ब्रा० तः विधिस्तेन। सिद्ध्यर्थं यात्रिकाः। अलं पर्याप्तं यथा तथा अवसरे तुलिताः ताभिः। दैवं बलवदित्यचिन्त्यं ननु पुरु० इत्या०।

---

१ गः सुवा. २ क्षणेन सोप्यन्यं एव. ३ सहपथिकाः, ४ कारणव.

अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।
दैवमिति यदपि कथयसि पुरुषगुणः सोऽप्यदृष्टाख्यः ॥ ३० ॥
भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधु साहसिकाः ।
प्राणानद्भुतमेतच्चरितं चरितं ह्युदाराणाम् ॥ ३१ ॥
क्लेशस्याङ्गमदत्त्वा सुखमेव सुखानि नेह लभ्यन्ते ।
मधुभिन्मथनायस्तैराश्लिष्यति बाहुभिर्लक्ष्मीम् ॥ ३२ ॥
तस्य कथं न चला स्यात्पत्नी विष्णोर्नृसिंहकस्यापि ।
मासांश्चतुरो निद्रां यः सेवति जलगतः सततम् ॥ ३३ ॥
दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतम् ।
जयति तुलामधिरूढो भास्वानिह जलदपटलानि ॥ ३४ ॥

तत्कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेशशाकिनीसाधनश्मशानसेवनमहामांसविक्रयसाधकवर्तिप्रभृतीनामेकतम इति । अद्भुतशक्तिर्भवाञ्श्रूयते । वयमप्यतिसाहसिकाः । उक्तं च ।

महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ॥ ३५ ॥

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहूपायं सिद्धिवर्तिचतुष्टयं कृत्वार्पयत् । आह च गम्यतां हिमालयदिशि । तत्र संप्राप्तानां यत्र वर्तिः पतिष्यति तत्र निधानं प्राप्स्यथासंदिग्धम् । तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुट्यताम् । तथानुष्ठिते तेषां गच्छतामेकतमस्य हस्ताद्वर्तिर्निपपात । अथासौ यावत्तं प्रदेशं खनति तावत्ताम्रमयी भूमिः । ततस्तेनाभिहितम्-अहो गृह्यतां स्वेच्छया ताम्रम् । अन्ये प्रोचुः भो मूढ किमनेन क्रियते । तत्प्रभूतमपि दारिद्र्यं न नाशयति । तदुत्तिष्ठाग्रतो गच्छामः । सोऽब्रवीत् यान्तु भवन्तो नाहमग्रे यास्यामि । एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः । ते त्रयोऽप्यग्रे प्रस्थिताः । अथ किंचिन्मात्रं गतस्याग्रेसरस्य वर्तिर्निपपात । सोऽपि यावत्खनितुमारब्धस्तावद्रूप्यमयी क्षितिः । ततः प्रहर्षितः प्राह यद्भो गृह्यतां यथेच्छया रूप्यम् । नाग्रे गन्तव्यम् । तावूचतुः भोः पृष्ठतस्ताम्रमयी भूमिरग्रतो रूप्यमयी । तन्नूनमग्रे सुवर्ण-

---

सोऽपि दैवमिति पुरुषगुणः पुरुषकृतं कर्मैव । तदुक्तं हितोपदेशे—पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते । इति । अदृष्टमित्याख्या यस्य । साहसिका गुरुलोकाद् अतुलं नास्ति तुला यस्य तदतिमहदपीत्यर्थः । भयं प्राणांश्च साधु तृणमिव तुलयन्ति इत्यन्वयः । क्लेशस्याङ्गमदत्वा क्लेशानकृत्वा । सुखमेव सुखेनैव । मधुभिद् मधुरिपुर्विष्णुः । परभाग उत्कर्षः । शाकिनी पिशाचभेदः । महामांसं नरमांसम् । ...साधनवर्तिश्च प्रभृतिर्येषाम् । व्याघुट्यतां निवृत्यताम् । प्रभूतेनापि भारभूतेन ।

---

१ अत्यन्तसिद्धिः. २ गम्यताम्.

मयी भविष्यति। तदनेन प्रभूतेनापि दारिद्र्यनाशो न भवति। तदावामग्रे यास्यावः। एवमुक्त्वा द्वावप्यग्रे प्रस्थितौ। सोपि स्वशक्त्या रूप्यमादाय निवृत्तः। तयोरपि गच्छतोरेकस्याग्रे वर्तिः पपात। सोपि प्रहृष्टो यावत्खनति तावत्सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह। भो गृह्यतां स्वेच्छया सुवर्णम्। सुवर्णादन्यन्न किंचिदुत्तमं भविष्यति। स प्राह मूढ न किंचिद्वेत्सि। प्राक्ताम्रं ततो रूप्यं ततः सुवर्णं तन्नूनमतः परं रत्नानि भविष्यन्ति येषामेकतमेनापि दारिद्र्यनाशो भवति। तदुत्तिष्ठाग्रे गच्छावः। किमनेन भारभूतेनापि प्रभूतेन। स आह। गच्छतु भवान्। अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि[1]। तथानुष्ठिते सोपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसंतप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युत इतश्चेतश्च बभ्राम। अथ भ्राम्यन्स्थलोपरि[2] पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत्। ततो द्रुततरं गत्वा तमवोचत्। भोः को भवान्। किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि। तत्कथय मे यदि कुत्रचिज्जलमस्ति। एवं तस्य प्रवदतस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम्। स आह भद्र किमेतत्। स आह यन्ममाप्येवमेवैतच्छिरसि चटितम्। स आह तत्कथय कदैतदुत्तरिष्यति। महती मे वेदना वर्तते। स आह। यदा त्वमिव कश्चिद्धृतसिद्धिवर्तिरेवमागत्य त्वामालापयिष्यति तदा तस्य[3] मस्तके चटिष्यति। स आह कियान्कालस्तवैवं स्थितस्य। स आह सांप्रतं को राजा धरणीतले। स आह वीणावत्सराजः। स आह। अहं तावत्कालसंख्यां न जानामि। परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्तिमादायानेन पथा समायातः। ततो मयान्यो नरो मस्तकधृतचक्रो दृष्टः पृष्टश्च। ततश्चैतज्जातम्। स आह। भद्र कथं तवैवं स्थितस्य भोजनजलप्राप्तिरासीत्। स आह। भद्र धनदेन निधानहरणभयात्सिद्धानामेतद्भयं दर्शितम्। तेन कश्चिदपि नागच्छति। यदि कश्चिदायाति स क्षुत्पिपासानिद्रारहितो जरामरणवर्जितः केवलमेवं वेदनामनुभवतीति। तदाज्ञापय माम्। मुक्तोस्मि। सांप्रतं स्वगृहं यास्यामि। इत्युक्त्वा गतः। अथ तस्मिंश्चिरयति स सुवर्णसिद्धिस्तस्यान्वेषणपरस्तत्पदपङ्क्त्या यावत्किंचिद्वनान्तरमागच्छति तावद्रुधिरप्लावितशरीरस्तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः क्वणन्नुपविष्टस्तिष्ठति। ततः समीपवर्तिना भूत्वा सबाष्पं पृष्टः भद्र किमेतत्। स

ग्रीष्मसम्बन्धी अर्कः ग्रीष्मार्कस्तस्य प्रतापेन संतप्ता तनुर्यस्य। भ्रमच्चक्रं मस्तके यस्य। चटितं निष्क्रम्य स्थितम्। तत्परिमाणमस्य तावान् कालस्तस्य संख्याम्।

१ पालयामि. २ भ्राम्यन्यावत्तिष्ठति. ३ त्वां मुक्त्वा तस्य. ४ नव्यः. ५ आद्यः. ६ मां गृहाय।

आह विधिनियोगः। स आह। कथं तत्। कथयं कारणमेतस्य। सोपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत्। तच्छ्रुत्वासौ तं विगर्हयन्निदमाह भो निषिद्धस्त्वं मयानेकशो न शृणोषि मे वाक्यम्। तत्किं क्रियते। विद्यावानपि कुलीनोपि बुद्धिरहितः किं करोति। अथवा साध्विदमुच्यते।

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः॥ ३६॥

चक्रधर आह कथमेतत्। सुवर्णसिद्धिराह।

कथा ३.

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परं मित्रभावमुपगता वसन्ति स्म। तेषां त्रयः शास्त्रपारं गताः परंतु बुद्धिरहिताः। एकस्तु बुद्धिमान्केवलं शास्त्रपराङ्मुखः। अथ तैः कदाचिन्मित्रैर्मन्त्रितम्। को गुणो विद्याया येन देशान्तरं गत्वा भूपतीन्परितोष्यार्थोपार्जना न क्रियते। तत्पूर्वदेशं गच्छामः। तथानुष्ठिते कंचिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह। अहो अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान्। न च राजप्रतिग्रहो बुद्ध्या लभ्यते विद्यां विना। तन्नास्मै स्वोपार्जितं दास्यामः। तद्गच्छतु गृहम्। ततो द्वितीयेनाभिहितम्-भोः सुबुद्धे गच्छ त्वं स्वगृहे यतस्ते विद्या नास्ति। ततस्तृतीयेनाभिहितम्-अहो न युज्यत एवं कर्तुं यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः। तदागच्छतु महानुभावोस्मदुपार्जितवित्तस्य संविभागी भविष्यतीति। उक्तं च।

किं तया क्रियते लक्ष्म्या या वधूरिव केवला।
या न वेश्येव सामान्या पथिकैरुपभुज्यते॥ ३७॥

बुद्धरहितो विवेकहीनः। शास्त्रेभ्यः पराङ् मुखं यस्य।

---

१ सोब्रवीदेतच्चक्रारोहणं. २ सुवर्णसिद्धिस्तमाह. ३ विद्यातः. ४ न पश्यन्ति. ५ पारगाः. ६ मिलितैः. ७ गत्वार्थोपार्जनं कुर्मः। अथ किंचिन्मार्गं गत्वा मन्त्रं चक्रुः। अहो परदेशगतैर्विद्ययार्थो लभ्यते। ततो यो यां विद्यां जानाति स आत्मीयां निवेदयतु येन सर्वेषां धृतिर्भवति। तत्रैकेनोक्तमहं विश्वकर्ममतं सम्यग्जानामि। यदि मृतकस्यापि त्वक्चर्मास्थीनि लभ्यानि तद्भूयोपि स्वस्थाने नियोजयामि। ततो द्वितीयेनोक्तं मम मन्त्रशक्तिरस्ति। ततोहं...तेषामुपरि मांसं त्वचं रक्तं च संचारयामि। ततस्तृतीयेनोक्तमहं मृतकसंजीवनीं विद्यां जानामि। यथा मृतोपि जीवति। ततश्चतुर्थेनोक्तमहमविद्यः परमेकां बुद्धिं जानामि। एवं विचिन्त्य परं हृष्टमनसः प्रस्थिताः। इत्यधिको ग्रन्थः पुस्त०. ८ समभागी.

तथा च ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ ३८ ॥

तदागच्छत्वेषोपीति । तथानुष्ठिते तैर्मार्गाश्रितैरटव्यां मृतसिंहस्यास्थीनि दृष्टानि । ततश्चैकेनाभिहितम् । अहो विद्याप्रत्ययः क्रियते । किंचिदेतत्सत्त्वं मृतं तिष्ठति । तद्विद्याप्रभावेण जीवसहितं कुर्मः । अहमस्थिसंचयं करोमि । ततश्चैकेनौत्सुक्यादस्थिसंचयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम् । तृतीयोपि यावज्जीवं संचारयति तावत्सुबुद्धिना निषिद्धः । भोस्तिष्ठतु भवान् । एष सिंहो निष्पाद्यते । यद्येनं सजीवं करिष्यसि ततः सर्वानपि व्यापादयिष्यति । इति तेनाभिहितः स आह धिङ् मूर्ख नाहं विद्याया विफलतां करोमि । ततस्तेनाभिहितम्-तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि । तथानुष्ठिते यावत्सजीवः कृतस्तावत्ते त्रयोपि सिंहेनोत्थाय व्यापादिताः । स च पुनर्वृक्षादवतीर्य गृहे गतः । अतोहं ब्रवीमि । वरं बुद्धिर्न सा विद्या इति । अतः परमुक्तं च ।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः ।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥ ३९ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

कथा ४ ।

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वमापन्ना वसन्ति स्म । बालभावे तेषां मतिरजायत । भो देशान्तरं गत्वा विद्याया उपार्जनं क्रियते । अथान्यस्मिन्दिवसे ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं कान्यकुब्जे गताः । तत्र च विद्यामठे गत्वा पठन्ति । एवं द्वादशाब्दानि यावदेकचित्ततया विद्याकुशलास्ते सर्वे संजाताः । ततस्तैश्चतुर्भिर्मिलित्वोक्तम् । वयं सर्वविद्यापारे गताः तदुपाध्यायमुत्कलापयित्वा स्वदेशे गच्छामः । तथैव क्रियतामित्युक्त्वा ब्राह्मणा उपाध्यायमुत्कलापयित्वानुज्ञां लब्ध्वा पुस्तकानि गृहीत्वा प्रचलिताः । यावत्किंचिन्मार्गं यान्ति तावद् द्वौ पन्थानौ समायातौ । उपविष्टाः सर्वे । तत्रैकः प्रोवाच । केन मार्गेण गच्छामः । एतस्मिन्समये तस्मिन्पत्तने कश्चिद्वणिक्पुत्रो मृतः । तस्य दाहार्थं महाजनो गतोभूत् । ततश्चतुर्णां मध्यादेकेन पुस्तकमवलोकितम्-महाजनो येन गतः स पन्था इति तन्महाजनमार्गेण गच्छामः ।

अस्थिसंचयमस्थ्नां पुनर्घटनां । उत्कला० आपृच्छ्य । महाजन इति महाजनाचरितमेवानुष्ठातव्यमिति वास्तवोर्थः ।

१ अहो अद्य. २ जीवन. ३ मनुजापयित्वा. ४ नीत्वा. ५ पण्डितानां मध्या.

अथ ते पण्डिता यावन्महाजनमेलापकेन सह यान्ति तावद्रासभः कश्चित्तत्र श्मशाने दृष्टः। अथ द्वितीयेन पुस्तकमुद्धाट्यावलोकितम्।

उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥ ४०॥

तदहो अयमस्मदीयो बान्धवः। ततः कश्चित्तस्य ग्रीवायां लगति। कोपि पादौ प्रक्षालयति। अथ यावद्दिशामवलोकनं कुर्वन्ति ते पण्डिताः तावत्कश्चिदुष्ट्रो दृष्टः। तैश्चोक्तम् एतत्किम्। तावत्तृतीयेन पुस्तकमुद्धाट्योक्तम् धर्मस्य त्वरिता गतिः। एष धर्मस्तावत्। चतुर्थेनोक्तम् इष्टं धर्मेण योजयेत्। अथ तैश्च रासभ उष्ट्रग्रीवायां बद्धः। केनचिद्रजकस्याग्रे कथितम्। यावद्रजकस्तेषां मूर्खपण्डितानां प्रहारकरणाय समायातस्तावत्ते प्रनष्टाः। यावदग्रे किंचित्स्तोकं मार्गं यान्ति तावत्काचिन्नद्यासादिता। ततस्या जलमध्ये पलाशपत्रमायातं दृष्ट्वा पण्डितेनैकेनोक्तम्। आगमिष्यति यत्पत्रं तदस्मांस्तारयिष्यति। एतत्कथयित्वा तत्पत्रस्योपरि पतितो यावन्नद्या नीयते तावत्तं नीयमानमवलोक्यान्येन पण्डितेन केशान्तं गृहीत्वोक्तम्।

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः॥ ४१॥

इत्युक्त्वा तस्य शिरश्छेदो विहितः। अथ तैश्च पश्चाद्गत्वा कश्चिद्ग्राम आसादितः। तेपि ग्रामीणैर्निमन्त्रिताः पृथक्पृथग्गृहेषु नीताः। तत एकस्य सूत्रिका घृतखण्डसंयुक्ता भोजने दत्ताः। ततो विचिन्त्य पण्डितेनोक्तम् यद्दीर्घसूत्री विनश्यति। एवमुक्त्वा भोजनं परित्यज्य गतः। तथा द्वितीयस्य मण्डका दत्ताः। तेनाप्युक्तम्। अतिविस्तरविस्तीर्णं तद्भवेन्न चिरायुषम्। स च भोजनं त्यक्त्वा गतः। अथ तृतीयस्य वटिकाभोजनं दत्तम्। तत्रापि पण्डितेनोक्तम्। छिद्रेष्वनर्था बहुलीभवन्ति। एवं तेपि त्रयः पण्डिताः क्षुत्क्षामकण्ठा लोकैर्हास्यमानास्ततः स्थानात्स्वदेशं गताः। अथ सुवर्णसिद्धिराह। यत्त्वं लोकव्यवहारमजानन्मया वार्यमाणोपि न स्थितस्तत ईदृशीमवस्थामुपगतः। अतोहं ब्रवीमि अपि शास्त्रेषु कुशलाः इति। तच्छ्रुत्वा चक्रधर आह-अहो अकारणमेतत्। बहुबुद्धयोपि विनश्यन्ति दुष्टदैवेन नाशिताः। स्वल्पबुद्धयोप्येकस्मिन्कुले नन्दन्ति संततम्। उक्तं च।

अकारणं लोकव्यवहाराज्ञानमल्पं कारणम्। बहुबुद्धयो महाबुद्धयः।

---

१ आतुरे. २ फेनिकाघृत॰ संयुक्तं भोजनं दत्तम्. ३ खाजिका.

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥४२॥

तथा च।

शतबुद्धिः शिरस्थोऽयं लम्बश्च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ४३ ॥

सुवर्णसिद्धिराह कथमेतत्। स आह—

कथा ९.

कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः स्म। अथ तयोरेकबुद्धिर्नाम मण्डूको मित्रतां गतः। एवं ते त्रयोऽपि जलतीरे कंचित्कालं वेलायां सुभाषितगोष्ठीसुखमनुभूय भूयोऽपि सलिलं प्रविशन्ति। अथ कदाचित्तेषां गोष्ठीगतानां जालहस्ता धीवराः प्रभूतैर्मत्स्यैर्व्यापादितैर्मस्तके विधृतैरस्तमनवेलायां तस्मिञ्जलाशये समायाताः। ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः-अहो बहुमत्स्योऽयं ह्रदो दृश्यते स्वल्पसलिलश्च। तत्प्रभाते त्रागमिष्यामः। एवमुक्त्वा स्वगृहं गताः। मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः। ततो मण्डूक आह। भोः शतबुद्धे सहस्रबुद्धे श्रुतं धीवरोक्तं भवद्भ्याम्। तत्किमत्र युज्यते कर्तुं पलायनमवष्टम्भं वा। यत्कर्तुं युक्तं भवति तदादिश्यतामद्य। तच्छ्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह। भोः मित्र मा भैषीर्यतो वचनश्रवणमात्रादेव भयं न कार्यम्। न भेतव्यम्। उक्तं च।

सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्तते जगत् ॥ ४४ ॥

तत्तावत्तेषामागमनमपि न संपत्स्यते। भविष्यति वा तर्हि त्वां बुद्धिप्रभावेणात्मसहितं रक्षयिष्यामि यतोऽनेकां सलिलगतिचर्यामहं जानामि। तदाकर्ण्य शतबुद्धिराह। भो युक्तमुक्तं भवता। सहस्रबुद्धिरेव भवान्। अथवा साध्विदमुच्यते।

बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किंचन।
बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः ॥ ४५ ॥

तथा च।

न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥ ४६ ॥

शतं बुद्धयो यस्य। सलिले गतिर्भ्रमणं तस्याः चर्या प्रकारः। अगम्यमसाध्यम्।

---

१ कुतोऽग्रामः. २ स्थितानां. ३ अवष्टम्भः. ४ आदेशनीयम्. ५ स्मरण. ६ अस्मात्परं-सार्थमभिधानं तव इत्य० ए. पुन०.

ततो वचनश्रवणमात्रादपि पितृपर्यायागतं जन्मस्थानं त्यक्तुं न शक्यते। उक्तं च। न तत्स्वर्गेऽपि सौख्यं स्याद्दिव्यस्पर्शनशोभने।
कुस्थानेऽपि भवेत्पुंसां जन्मनो यत्र संभवः ॥ ४७ ॥

तन्न कदाचिदपि गन्तव्यम्। अहं त्वां स्वबुद्धिप्रभावेण रक्षयिष्यामि। मण्डूक आह। भद्रौ मम तावदेकैव बुद्धिः पलायनपरा। तदहमन्यं जलाशयमद्यैव सभार्यो यास्यामि। एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गतः। धीवरैरपि प्रभात आगत्य जघन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः। तावपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरमात्मानं गतिविशेषविज्ञानै रक्षन्तौ जाले पतितौ व्यापादितौ च। अथापराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः। गुरुत्वाच्चैकेन तेषां शतबुद्धिः शिरसि कृतः। सहस्रबुद्धिः प्रलम्बमानो नीयते। ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वाभिहिता स्वपत्नी प्रिये पश्य पश्य—

शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ४८ ॥

अतोऽहं ब्रवीमि नैकान्ते बुद्धिरपि प्रमाणम्। सुवर्णसिद्धिराह यद्यप्येतदस्ति तथापि मित्रवचनमनुल्लङ्घनीयम्। परं किं क्रियते। निवारितोऽपि मया त्वं न स्थितोऽतिलौल्याद्विद्याहंकाराच्च। अथवा साध्विदमुच्यते।

साधु मातुल गीतेन मया प्रोक्तोऽपि न स्थितः।
अपूर्वोऽयं मणिर्बद्धः संप्राप्तं गीतलक्षणम् ॥ ४९ ॥

चक्रधर आह। कथमेतत्। सोऽब्रवीत्।

कथा ६.

कस्मिंश्चिदधिष्ठाने उद्धतो नाम गर्दभः प्रतिवसति स्म। स सदैव रजकगृहे भारोद्वहनं कृत्वा रात्रौ स्वेच्छया पर्यटति। ततः प्रत्यूषे बन्धनभयात्स्वयमेव रजकगृहमायाति। रजकोऽपि ततस्तं बन्धनेन नियुनक्ति। अथ तस्य रात्रौ पर्यटतः क्षेत्राणि कदाचिच्छृगालेन सह मैत्री संजाता। स च पीवरत्वाद्वृतिभङ्गं कृत्वा कर्कटिकाक्षेत्रे शृगालसहितः प्रविशति। एवं

दिव्यानां स्पर्शनं तेन शोभनस्तस्मिन्। यत्र संभवो जन्म तस्मिन् कुस्थानेऽपि पुंसां यत्सौख्यं भवेत् तत् इत्यन्वयः। एकान्ते अत्यन्तम्। गीतलक्षणं गीतप्रावीण्यचिह्नम्। वृतिः कंटकादिवेष्टनम्।

---

१ पितृपितामहोपार्जितं. २ स्पर्शेन शोभिते. ३ सु ४ भद्र ५ अतः परं–कुटिलचारेण इत्यधि०. ६ स्कन्धे. ७ कृतोन्नामो. ८ वारितोऽपि न शिक्षसे. ९ सांप्रतं गीतजं फलम्. १० उद्धतमदः. ११ कर्म.

तौ स्वेच्छया चिर्भटिकाभक्षणं कृत्वा प्रत्यहं प्रत्यूषे स्वस्थानं व्रजतः। अथ कदाचित्तेन मदोद्धतेन रासभेन क्षेत्रमध्यस्थितेन शृगालोऽभिहितः। भो भगिनीसुत पश्य पश्य। अतीव निर्मला रजनी। तदहं गीतं करिष्यामि। तत्कथय कतमेन रागेण करोमि। स आह। माम किमनेन वृथानर्थप्रचालनेन यतश्चौरकर्मप्रवृत्तावावां निभृतैश्च चौरजारैरत्र स्थातव्यम्।

उक्तं च। कासी विवर्जयेच्चौर्यं निद्रालुश्चेत्स चौरिकाम्।
जिह्वालौल्यं रुजाक्रान्तो जीवितं योऽत्र वाञ्छति॥ ५०॥

अपरं त्वदीयं गीतं न मधुरस्वरम्। शङ्खशब्दानुकारं दूरादपि श्रूयते। तदत्र क्षेत्रे रक्षापुरुषाः सुप्ताः सन्ति। त उत्थाय वधं बन्धं वा करिष्यन्ति तद्भक्षय तावदमृतमयीश्चिर्भटीः। मा त्वमव्यापारपरो भव। तच्छ्रुत्वा रासभ आह। भो न त्वं वेत्सि गीतरसं वनाश्रयत्वात्। तेनैतद्ब्रवीषि।

उक्तं च। शरज्ज्योत्स्नाहते दूरं तमसि प्रियसंनिधौ।
धन्यानां जायते कर्णे गीतझङ्कारजा सुधा॥ ५१॥

शृगाल आह। माम अस्त्येतत्परं न वेत्सि त्वं गीतम्। केवलमुन्नदसि तत्किं तेन स्वार्थभ्रंशकेन। रासभ आह। धिग्धिङ् मूर्ख किमहं न जानामि गीतम्। तद्यथा तस्य भेदाञ्छृणु।

सप्त स्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः।
तानास्त्वेकोनपञ्चाशदित्येतत्स्वरमण्डलम्॥ ५२॥
स्थानत्रयं यतीनां च षडास्यानि रसा नव।
रागाः षड्विंशतिर्भावाश्चत्वारिंशत्ततः स्मृताः॥ ५३॥
पञ्चाशीत्यधिकं ह्येतद्गीताङ्गानां शतं स्मृतम्।
स्वयमेव पुरा प्रोक्तं भरतेन श्रुतेः परम्॥ ५४॥
नान्यद्गीतात्प्रियं लोके देवानामपि दृश्यते।
शुष्कस्नायुस्वराह्लादात्र्यक्षं जग्राह रावणः॥ ५५॥

तत्कथं भगिनीसुत मामनभिज्ञं वदन्निवारयसि। शृगाल आह। माम यद्येवं तदहं तावद्वृतेर्द्वारस्थितः क्षेत्रपमवलोकयामि। त्वं पुनः स्वेच्छया गीतं कुरु। तथानुष्ठिते रासभरटनमाकर्ण्य क्षेत्रपः क्रोधाद्दन्तान्घर्षयन्प्र-

---

कासी कासवान्। सुधा अमृततुल्यानन्दः। ग्रामाः स्वरसंघातभेदाः। मूर्च्छनाः स्वरारोहावरोहक्रमभेदाः। पञ्चाशीति—सप्तस्वरा इत्यनेन त्रीणि स्वरसप्तकानि गृह्यन्ते तेनेयं संख्या लभ्यते। त्र्यक्षं शिवं जग्राह वशीचकार।

---

१ अलमनेनानर्थप्रलपनेन. २ कासयुक्तस्त्यजेत्. ३ चेत्, निद्रालुब्धश्च. ४ अत्र गीतव्या०. ५ यदा स्त्री सहते धूर्तं...संगमे। ६ विंशति. ७ संस्कार. ८ ताला... तिस्रो मात्रा लयास्त्रयः। ९ भिन्नवत्. १० उर्ध्वकन्धरां कृत्वा शब्दायितुमारब्धः। ततो रा०.

धावितः। यावद्रासभो दृष्टस्तावल्लकुटप्रहारैस्तथा हतो यथा प्रताडितो भूपृष्ठे पतितः। ततश्च सच्छिद्रोलूखले बद्धा गतो भूयोपि प्रसुप्तः। रासभोपि स्वजातिस्वभावाद्गतवेदनः क्षणेनाभ्युत्थितः। उक्तं च।

सारमेयस्य चाश्वस्य रासभस्य विशेषतः।
मुहूर्तात्परतो न स्यात्प्रहारजनिता व्यथा॥ ५६॥

ततस्तमेवोलूखलमादाय वृतिं चूर्णयित्वा पलायितुमारब्धः। अत्रान्तरे शृगालोपि दूरादेव तं दृष्ट्वा सस्मितमाह।

साधु मातुल गीतेन मया प्रोक्तोपि न स्थितः।
अपूर्वोयं मणिर्बद्धः संप्राप्तं गीतलक्षणम्॥ ५७॥

तद्भवानपि मया वार्यमाणोपि न स्थितः। तच्छ्रुत्वा चक्रधर आह। भो मित्र सत्यमेतत्। अथवा साध्विदमुच्यते।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः।
स एव निधनं याति यथा मन्थरकौलिकः॥ ५८॥

सुवर्णसिद्धिराह। कथमेतत्। सोब्रवीत्।

कथा ७.

कस्मिंश्चिदधिष्ठाने मन्थरको नाम कौलिकः प्रतिवसति स्म। तस्य कदाचित्पटकर्माणि कुर्वतः सर्वपटकर्मकाष्ठानि भग्नानि। ततः स कुठारमादाय वने काष्ठार्थं गतः। स च समुद्रतटं यावद्भ्रमन्प्रयातः। ततश्च तत्र शिंशपापादपस्तेन दृष्टः। ततश्चिन्तितवान्। महानयं वृक्षो दृश्यते। तदनेन कर्तितेन प्रभूतानि पटकर्मोपकरणानि भविष्यन्ति। इत्यवधार्य तस्योपरि कुठारमुत्क्षिप्तवान्। अथ तत्र वृक्षे कश्चिद्व्यन्तरः समाश्रित आसीत्। अथ तेनाभिहितम्। भोः ममाश्रयोयं पादपः सर्वथा रक्षणीयो यतोहमत्र महासौख्येन तिष्ठामि समुद्रकल्लोलस्पर्शनाच्छीतवायुनाप्यायितः। कौलिक आह। भोः किमहं करोमि दारुसामर्थ्यं विना मे कुटुम्बं बुभुक्षया पीड्यते। तस्मादन्यत्र शीघ्रं गम्यताम्। अहमेनं कर्तयिष्यामि। व्यन्तर आह। भोस्तुष्टस्तवाहम्। तत्प्रार्थ्यताम‌भीष्टं किंचित्। रक्षैनं पादपमिति। कौलिक आह। यद्येवं तदहं स्वगृहं गत्वा स्वमित्रं स्वभार्यां च पृष्ट्वागमिष्यामि। ततस्त्वया देयम्। अथ तथेति प्रतिज्ञाते व्यन्तरेण स कौलिकः प्रहृष्टः स्वगृहं प्रति निवृत्तः। यावदग्रे गच्छति तावद्ग्रामप्रवेशे निजसुहृदं नापितमपश्यत्। ततस्तस्य व्यन्तरवाक्यं निवेदयामास। यदहो मित्र मम कश्चिद्व्यन्तरः

समुद्रस्य कल्लोला बृहत्तरंगास्तेषां स्पर्शनं तस्मात्।

---

१ पत्नीं. २ व्यन्तरसंवाचिकप्रहृष्टः।

सिद्धः । तत्कथय किं प्रार्थये । अहं त्वां प्रष्टुमागतः । नापित आह-भद्र यद्येवं तद्राज्यं प्रार्थयस्व येन त्वं राजा भवस्यहं त्वन्मन्त्री । द्वावपीह सुखमनुभूय परलोकसुखमनुभवावः । उक्तं च ।

राजा न्यायपरो नित्यमिह कीर्तिमवाप्य च ।
तत्प्रभावात्पुनः स्वर्गे स्पर्धते त्रिदशैः सह ॥ ५९ ॥

कौलिक आह अस्त्येतत्परं तथापि गृहिणीं पृच्छामि । स आह भद्र शास्त्रविरुद्धमेतद्यत्स्त्रिया सह मन्त्रो यतस्ताः स्वल्पमतयो भवन्ति । उक्तं च ।

भोजनाच्छादने दद्यादृतुकाले च संगमम् ।
भूषणाद्यं च नारीणां न ताभिर्मन्त्रयेत्सुधीः ॥ ६० ॥

यत्र स्त्री यत्र कितवो बालो यत्र प्रशासिता ।
राजन्निर्मूलतां याति तद्गृहं भार्गवोऽब्रवीत् ॥ ६१ ॥

तावत्स्यात्सुप्रसन्नास्यस्तावद्गुरुजने रतः ।
पुरुषो योषितां यावन्न शृणोति वचो रहः ॥ ६२ ॥

एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः ।
न तासां वल्लभः कोऽपि सुतोऽपि स्वसुखं विना ॥ ६३ ॥

कौलिक आह । तथापि प्रष्टव्या सा मया यतः पतिव्रता सा । अपरं तामपृष्ट्वाहं न किंचित्करोमि । एवं तमभिधाय सत्वरं गत्वा तामुवाच । प्रिये अद्यास्माकं कश्चिद्व्यन्तरः सिद्धः । स वाञ्छितं प्रयच्छति । तदहं त्वां प्रष्टुमागतः । तत्कथय किं प्रार्थये । एष तावन्मम मित्रं नापितो वदत्येवं यद्राज्यं प्रार्थयस्व । साह । आर्यपुत्र का मतिर्नापितानाम् । तन्न कार्यं तद्वचः । उक्तं च ।

चारणैर्वन्दिभिर्नीचैर्नापितैर्बालकैरपि ।
न मन्त्रं मतिमान्कुर्यात्सार्धं भिक्षुभिरेव च ॥ ६४ ॥

अपरं महती क्लेशपरंपरैषा राज्यस्थितिः । संधिविग्रहयानासनसंश्रयद्वैधीभावादिभिः कदाचित्पुरुषस्य सुखं न प्रयच्छतीति । यतः ।

यदैव राज्ये क्रियतेऽभिलाषस्तदैव याति व्यसनेषु बुद्धिः ॥
घटा नृपाणामभिषेककाले सहाम्भसैवापदमुद्गिरन्ति ॥ ६५ ॥

यत्र यस्मिन्गृहे स्त्री प्रशासित्री । कितवो द्यूतकृत । चारणाः कुशीलवाः । राज्यस्थितिः राज्यपरिपालनकर्म ।

---

१ दान०, व्यय०. २ तद्गृहं क्षयमायाति भार्गवो हीद०. ३ रतिः.

तथा च ।

रामस्य व्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम् ।
सौदासं तदवस्थमर्जुनवधं संचिन्त्य लङ्केश्वरं
दृष्ट्वा राज्यकृते विडम्बनगतं तस्मान्न तद्वाञ्छयेत् ॥ ६६ ॥

यदर्थं भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः ।
वधं राज्यकृते राज्ञां तद्राज्यं दूरतस्त्यजेत् ॥ ६७ ॥

कौलिक आह सत्यमुक्तं भवत्या । तत्कथय किं प्रार्थये । साह त्वं तावदेकं पटं नित्यमेव निष्पादयसि । तेन सर्वा व्ययशुद्धिः संपद्यते । इदानीं त्वमात्मनोन्यद्बाहुयुगलं द्वितीयं शिरश्च प्रार्थयस्व येन पटद्वयं संपादयसि पुरतः पृष्ठतश्च । एकस्य मूल्येन गृहे यथापूर्वं व्ययः शुध्यति द्वितीयस्य मूल्येन विशेषकृत्यानि क्रियन्ते । एवं सौख्येन स्वजातिमध्ये श्लाघ्यमानस्य कालो यास्यति । लोकद्वयस्योपार्जना भविष्यति । सोपि तदाकर्ण्य प्रहृष्टः प्राह-साधु पतिव्रते साधु । युक्तमुक्तं भवत्या । तदेवं करिष्यामि । एष मे निश्चयः । ततोसौ गत्वा व्यन्तरं प्रार्थयामास । भो यदि ममेप्सितं प्रयच्छसि तद्देहि मे द्वितीयं बाहुयुगलं शिरश्च । एवमभिहिते तत्क्षणादेव द्विशिराश्चतुर्बाहुश्च संजातः । ततो हृष्टमना यावद्गृहमागच्छति तावल्लोकै राक्षसोयमिति मन्यमानैर्लगुडपाषाणप्रहारैस्ताडितो मृतश्च । अतोहं ब्रवीमि । यस्य नास्ति स्वयं प्रज्ञा इति । चक्रधर आह । भोः सत्यमेतत् । सर्वोपि जनोश्रद्धेयामाशापिशाचिकां प्राप्य हास्यपदवीं याति । अथवा साध्विदमुच्यते केनापि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥ ६८ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

कथा ८.

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैर्घटः परिपूरितः । तं च घटं नाग-

---

व्यसनं पानस्त्रीमृगयादिषु सक्तिः । वृष्णीनां यादवानाम् । ईप्सितं वाञ्छितं । अश्रद्धेयां श्रद्धानर्हाम् । आशा एव पिशाचिका ताम् । अनागतवतीमागामिनमर्थमुद्दिश्येत्यर्थः ।

---

१ रामप्रव्रजनं वने निवसनम्. २ कारागारनिवेशनं च मरणं सांचिन्त्य लंकेश्वरे सर्वः कालवशाद्विनश्यति नरः कः कं परित्रायते ॥ इ. पा. ३ याचस्व. ४ स्थिति-र्भवति. ५ तेन.

दन्तेवलम्ब्य तस्याधस्तात्खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति। अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास यत्परिपूर्णोयं घटस्तावत्सक्तुभिर्वर्तते। तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते। ततस्तेन मयाजाद्वयं ग्रहीतव्यम्। ततः षाण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति। ततोजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीर्महिषीभिर्वडवाः। वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति। तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति। सुवर्णेन चतुःशालं गृहं संपद्यते। ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवयस्कां रूपाढ्यां कन्यां दास्यति। तत्सकाशात्पुत्रो मे भविष्यति। तस्याहं सोमशर्मेति नाम करिष्यामि। ततस्तस्मिञ्जानुचलनयोग्ये संजातेहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेश उपविष्टस्तदवधारयिष्यामि। अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरोश्वखुरासन्नवर्ती मत्समीपमागमिष्यति। ततोहं ब्राह्मणीं कोपाविष्टोभिधास्यामि। गृहाण तावद्बालकम्। सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति। ततोहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि। एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः। सक्तुभिः पाण्डुरतां गतः। अतोहं ब्रवीमि। अनागतवतीं चिन्ताम् इति। सुवर्णसिद्धिराह एवमेतत्। कस्ते दोषो यतः सर्वोपि लोभेन विडम्बितो बाध्यते। उक्तं च।

यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः॥ ६९॥

चक्रधर आह। कथमेतत्। स आह।

कथा ९.

कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्रा वानरक्रीडारता वानरयूथं नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नयन्ति स्म। अथ वानरयूथाधिपो यः स औशनसबार्हस्पत्यचाणक्यमतवित्तदनुष्ठाता च तान्सर्वानप्यध्यापयति स्म। अथ तस्मिन्राजगृहे लघुकुमारवाहनयोग्यं मेषयूथमस्ति। तन्मध्यादेको जिह्वालौल्यादहर्निशं निःशङ्कं महानसे प्रविश्य यत्पश्यति तत्सर्वं भक्षयति। ते च सूपकारा यत्किंचित्काष्ठं

प्राप्तवयस्कां प्राप्तविवाहयोग्यदशामित्यर्थः। जानुभ्यां चलनं भ्रमणं तस्य योग्ये सक्तुभिः सक्तुपिष्टेनेत्यर्थः। अंगपतितैः स ब्राह्मणः पाण्डुरतां गतः। उदर्कं परिणामम्। उशनसा शुक्राचार्येण प्रोक्तमौशनसम्। एवं बार्हस्पत्यादि। तदनुष्ठाता तन्मतेन वर्तमानः। लघुः कुमारः लघवः कुमारा वा तस्य तेषां वा वाहनं तस्य योग्यम्।

---

१ वेन. २ प्राप्तवराम्. ३ गृह्यतां तावद्बालकोयम्. ४ नैव बुद्धिम्. ५ चिदग्रं.

मृन्मयं भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति तेनाशु ताडयन्ति। सोऽपि वानरयूथपस्तद् दृष्ट्वा व्यचिन्तयत्। अहो मेषसूपकारकलहोऽयं वानराणां क्षयाय भविष्यति यतोऽन्नास्वादलम्पटोऽयं मेषो महाकोपाश्च सूपकारा यथासन्नवस्तुना प्रहरन्ति। तद्यदि वस्तुनोऽभावात्कदाचिदुल्मुकेन ताडयिष्यन्ति तदूर्णाप्रचुरोऽयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति। तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति सापि तृणप्राचुर्याज्ज्वलिष्यति। ततोऽश्वा वह्निदाघमवाप्स्यन्ति। शालिहोत्रेण पुनरेतदुक्तम्। यद्वानरवसया अश्वानां वह्निदाघदोषः प्रशाम्यति। तन्नूनमेतेन भाव्यमत्र निश्चयः। एवं निश्चित्य सर्वान्वानरानाहूय रहसि प्रोवाच। यत्

मेषेण सूपकाराणां कलहो यत्र जायते।
स भविष्यत्यसंदिग्धं वानराणां क्षयावहः॥ ७०॥
तस्मात्स्यात्कलहो यत्र गृहे नित्यमकारणः॥
तद्गृहं जीवितं वाञ्छन्दूरतः परिवर्जयेत्॥ ७१॥

तथा च।

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ ७२॥

तन्न यावत्सर्वेषां संक्षयो भवति तावदेतद्राजगृहं संत्यज्य वनं गच्छामः। अथ तत्तस्य वचनमश्रद्धेयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः। भो भवतो वृद्धभावाद्बुद्धिवैकल्यं संजातं येनैतद्ब्रवीषि। उक्तं च।

वदनं दशनैर्हीनं लाला स्रवति नित्यशः।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः॥ ७३॥

न वयं स्वर्गसमानोपभोगान्नानाविधान्भक्ष्यविशेषान्राजपुत्रैः स्वहस्तदत्तानमृतकल्पान्परित्यज्य तत्राटव्यां कषायकटुतिक्तक्षाररूक्षफलानि भक्षयिष्यामः। तच्छ्रुत्वाश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच। रे रे मूर्खा

आसन्नमनतिक्रम्य वर्तते इति यथासन्नं च तद्वस्तु च तेन। असंदिग्धमसंशयम्। कलहान्तानि कलहः अन्तः येषां कलहेन अन्तो येषामिति वा तानि। कलह उत्पन्ने विनश्यन्तीति भावः। कुत्सितं वाक्यं कुवाक्यं। कुत्सितं कर्म तदन्तो यस्य कुत्सितकर्मसमकालमेव विनश्यतीत्यर्थः। स्वर्गेण समान उपभोगो येषाम्। अमृतादीषन्न्यूना अमृतकल्पा इत्यर्थः।

---

१ एतन्नास्तिकचित्. २ यत्राधिकारिणां नित्यं कलहो दृश्यते गृहे। ३ रवै चिका०. ४ लालाक्रान्तं गतश्रुति.

यूयमेतस्य सुखस्य परिणामं न जानीथ । पाकेरसास्वादनप्रायमेतत्सुखं परिणामे विषवद्भविष्यति । तदहं कुलक्षयं स्वयं नावलोकयिष्यामि । सांप्रतं वनं यास्यामि । उक्तं च ।

मित्रं व्यसनसंप्राप्तं स्वस्थानं परपीडितम् ।
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ॥ ७४ ॥

एवमभिधाय सर्वांस्तान्परित्यज्य स यूथाधिपोऽटव्यां गतः । अथ तस्मिन्गतेऽन्यस्मिन्नहनि स मेषो महानसे प्रविष्टो यावत्सूपकारेण नान्यत्किंचित्समासादितं तावदर्धज्वलितकाष्ठेन ताड्यमानो जाज्वल्यमानशरीरः शब्दायमानोऽश्वकुट्यां प्रत्यासन्नवर्तिन्यां प्रविष्टः । तत्र तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि वह्निज्वालास्तथा समुत्थिता यथा केचिदश्वाः स्फुटितलोचनाः पञ्चत्वं गताः केचिद्बन्धनानि त्रोटयित्वार्धदग्धशरीरा इतश्चेतश्च हेषायमाणा धावमानाः सर्वमपि जनसमूहमाकुलीचक्रुः । अत्रान्तरे राजा सविषादः शालिहोत्रज्ञान्वैद्यानाहूय प्रोवाच । भोः प्रोच्यतामेषामश्वानां कश्चिद्दाहोपशमनोपायः । तेऽपि शास्त्राणि संचिन्त्य प्रोचुः । देव प्रोक्तमत्र विषये भगवता शालिहोत्रेण यत्—

कपीनां मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥ ७५ ॥

तत्क्रियतामेतच्चिकित्सितं द्राग्यावन्नैते दाहदोषेण विनश्यन्ति । सोऽपि तदाकर्ण्य समस्तवानरवधमादिष्टवान् । किं बहुना । सर्वेऽपि ते वानरा विविधायुधलगुडपाषाणादिभिर्व्यापादिता इति । अथ सोऽपि वानरयूथपस्तं पुत्रपौत्रभ्रातृसुतभागिनेयादिसंक्षयं ज्ञात्वा परं विषादमुपागतः । स त्यक्ताहारक्रियो वनाद्वनं पर्यटति । अचिन्तयच्च । कथमहं तस्य नृपापसदस्यानृणताकृत्येनापकृत्यं करिष्यामि । उक्तं च ।

मर्षयेद्धर्षणां योऽत्र वंशजां परनिर्मिताम् ।
भयाद्वा यदि वा कामात्स ज्ञेयः पुरुषाधमः ॥ ७६ ॥

अथ तेन वृद्धवानरेण कुत्रचित्पिपासाकुलेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितम् । तद्यावत्सूक्ष्मेक्षिकयावलोकयति तावद्वनचरमनुष्या-

---

पाकरसस्य आस्वादनं प्रचुरं यस्मिन् । भगिन्या अपत्यं पुमान् भागिनेयः । अविद्यमानं ऋणमस्य असौ अनृणस्तस्य भावोऽनृणता तस्याः कृत्यं वैरनिर्यातनार्थं कृत्यमित्यर्थः । ईक्षिकावलोकनं दृष्टिरित्यर्थः ।

---

१ पावक. २ संत्य०. ३ नृपसचिवादीनां स्वकुलनाशकर्तॄणां नाशं क०. ४ सूक्ष्मतया.

णां पदपङ्क्तिप्रवेशोऽस्ति न निष्क्रमणम् । ततश्चिन्तितम् । नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम् । तत्पद्मिनीनालमादाय दूरस्थोऽपि जलं पिबामि । तथानुष्ठिते तन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषितकण्ठस्तमुवाच—भो अत्र यः सलिले प्रवेशं करोति स मे भक्ष्य इति । तन्नास्ति धूर्ततरस्त्वत्समोऽन्यो यत्पानीयमनेन विधिना पिबसि । ततस्तुष्टोऽहम् । प्रार्थयस्व हृदयवाञ्छितम् । कपिराह—भोः कियती ते भक्षणशक्तिः । स आह—शतसहस्रायुतलक्षाण्यपि जलप्रविष्टानि भक्षयामि । बाह्यतः शृगालोऽपि मां दूषयति । वानर आह-अस्ति मे भूपतिना सहात्यन्तं वैरम् । यद्येनां रत्नमालां मे प्रयच्छसि तत्सपरिवारमपि तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्र सरसि यथा प्रविशति तथा करोमि । सोऽपि श्रद्धेयं वचस्तस्य श्रुत्वा रत्नमालां दत्त्वा प्राह-भो मित्र यत्समुचितं भवति तत्कर्तव्यमिति । वानरोऽपि रत्नमालाविभूषितकण्ठो वृक्षप्रासादेषु परिभ्रमञ्जनैर्दृष्टः पृष्टश्च भो यूथप भवानियन्तं कालं कुत्र स्थितः । भवतेदृग्रत्नमाला कुत्र लब्धा या दीप्त्या सूर्यमपि तिरस्करोति । वानरः प्राह-अस्ति कुत्रचिदरण्ये गुप्ततरं महत्सरो धनदनिर्मितम् । तत्र सूर्येऽर्धोदिते रविवासरे यः कश्चिन्निमज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निःसरति । अथ भूभुजा तदाकर्ण्य स वानरः समाहूतः पृष्टश्च—भो यूथाधिप किं सत्यमेतत् । रत्नमालासनाथं सरोऽस्ति क्वापि । कपिराह-स्वामिन् एष प्रत्यक्षतया मत्कण्ठस्थितया रत्नमालया प्रत्ययस्ते । तद्यदि रत्नमालाप्रयोजनं तन्मया सह कमपि प्रेषय येन दर्शयामि । तच्छ्रुत्वा नृपतिराह यद्येवं तदहं सपरिजनः स्वयमेष्यामि येन प्रभूता रत्नमालाः संपद्यन्ते । वानर आह स्वामिन् एवं क्रियताम् । तथानुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वैं कलत्रभृत्याः प्रस्थिताः । वानरोऽपि राज्ञा दोलाधिरूढेन स्वोत्सङ्ग आरोपितः सुखेन प्रीतिपूर्वमानीयते । अथवा साध्विदमुच्यते ।

तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि ।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि ॥ ७७ ॥

तथा च ।

इच्छति शती सहस्रं सहस्री लक्षमीहते ।
लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥ ७८ ॥

बाह्यतो जलाद्बहिः । वाक्प्रपञ्चेन वाचोविस्तारेण । ईदृशी रत्नमाला ईदृग्रत्नमाला तया विभूषितः कण्ठो यस्य । दोला यानविशेषः ।

---

१ धर्षयति. २ केनचिद्रूप०. ३ प्रवेशयामि. ४ राज याद्यः.

जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥ ७९ ॥

अथ तत्सरः समासाद्य वानरः प्रत्यूषसमये राजानमुवाच । देव अर्धोदिते सूर्येऽत्र प्रविष्टानां सिद्धिर्भवति । तत्सर्वोऽपि जन एकदैव प्रविशतु । त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमासाद्य प्रभूतास्ते रत्नमाला दर्शयामि । अथ प्रविष्टास्ते लोकाः सर्वे भक्षिता राक्षसेन। अथ तेषु चिरायमाणेषु राजा वानरमाह। भो यूथाधिप किमिति चिरायते मे जनः। तच्छ्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच । भो दुष्टनरपते राक्षसेनान्तः सलिलस्य स्थितेन भक्षितस्ते परिजनः। साधितं मया कुलक्षयजं वैरम् । तद्गम्यताम्। त्वं स्वामीति मत्वा नात्र प्रवेशितः। उक्तं च।

कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत् ॥ ८० ॥

तत्त्वया मम कुलक्षयः कृतो मया पुनस्तवेति । अथैतदाकर्ण्य राजा शोकाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः । अथ तस्मिन्भूपतौ गते राक्षसस्तृप्तो जलान्निष्क्रम्य सानन्दमिदमाह।

हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता।
नालेनास्वादितं तोयं साधु भो वटवानर ॥ ८१ ॥

अतोऽहं ब्रवीमि। यो लौल्यात्कुरुते कर्म इति । एवमुक्त्वा भूयोऽपि स चक्रधरमाह। भो मित्र प्रेषय मां येन स्वगृहं गच्छामि । चक्रधर आह। भद्र आपदर्थे धनमित्रसंग्रहः क्रियते । तन्मामेवंविधं त्यक्त्वा क यास्यसि। उक्तं च—

यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां सुहृत्।
कृतघ्नस्तेन पापेन नरके यात्यसंशयम् ॥ ८२ ॥

सुवर्णसिद्धिराह। भोः सत्यमेतद्यदि गम्यस्थाने शक्तिर्भवति। एतत्पुनर्मनुष्याणामगम्यस्थानम् । नास्ति कस्यापि शक्तिस्त्वामुन्मोचयितुम्। अपरं यथा यथा चक्रभ्रमवेदनया तव मुखविकारं पश्यामि तथा तथाहमेतज्जानामि यद् द्रागगच्छामि मा कश्चिन्ममाप्यनर्थो भवेत्। यतः—

कृते अपकारे प्रतिकृतिं प्रत्यपकारं कुर्यात्। हिंसिते हिंसाया कृतायाम्। यातमनतिक्रम्य वर्तते यथायातस्तेन। यस्त्यक्त्वेति नैष्ठुर्येण मित्रं त्यजतीत्यर्थः। गम्यस्थाने उपायसाध्येऽर्थे।

---

१ निष्ठुरः २ नालेन पिबता तोयं भवता साधु वा०।

यादृशी वदनच्छाया दृश्यते तव वानर ।
विकालेन गृहीतोसि यः परैति स जीवति ॥ ८३ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

कथा १०.

कस्मिंश्चिन्नगरे भद्रसेनो नाम राजा प्रतिवसति स्म । तस्य सर्वलक्षणसंपन्ना रत्नवती नाम कन्यास्ति । तां कश्चिद्राक्षसो जिहीर्षति । रात्रावागत्योपभुंक्ते । परं कृतरक्षोपधानां हर्तुं न शक्नोति । सापि तत्समये रक्षःसांनिध्यजामवस्थामनुभवति कम्पादिभिः । एवमतिक्रामति काले कदाचित्स राक्षसो मध्यनिशायां गृहकोणे स्थितः । सापि राजकन्या स्वसखीमुवाच । सखि पश्यैष विकालसमये नित्यमेव मां कदर्थयति । अस्ति तत्तस्य दुरात्मनः प्रतिषेधोपायः कश्चित् । तच्छ्रुत्वा राक्षसोपि व्यचिन्तयत् । नूनं यथाहं तथान्योपि कश्चिद्विकालनामास्या हरणाय नित्यमेवागच्छति । परं सोप्येनां हर्तुं न शक्नोति । तत्तावदश्वरूपं कृत्वाश्वमध्यगतो निरीक्षयामि किंरूपः स किंप्रभावश्चेति । एवं राक्षसोश्वरूपं कृत्वाश्वानां मध्ये तिष्ठति । तथानुष्ठिते निशीथसमये राजगृहे कश्चिदश्वचौरः प्रविष्टः । स च सर्वानश्वानवलोक्य तं राक्षसमश्वतमं विज्ञायाधिरूढः । अत्रान्तरे राक्षसश्चिन्तयामास । नूनमेष विकालनामा मां चौरं मत्वा कोपान्निहन्तुमागतः । तत्किं करोमि । एवं चिन्तयन्सोपि तेन खलीनं मुखे निधाय कशाघातेन ताडितः । अथासौ भयत्रस्तमनाः प्रधावितुमारब्धः । चौरोपि दूरं गत्वा खलीनाकर्षणेन तं स्थिरं कर्तुमारब्धवान् । स तु केवलं वेगाद्वेगतरं गच्छति । अथ तं तथागणितखलीनाकर्षणं मत्वा चौरश्चिन्तयामास-अहो नैवंविधा वाजिनो भवन्त्यगणितखलीनाः । तन्नूनमनेनाश्वरूपेण राक्षसेन भवितव्यम् । तद्यदि कंचित्पांसुलं भूमिदेशमवलोकयामि तदात्मानं तत्र पातयामि । नान्यथा मे जीवितव्यमस्ति । एवं चिन्तयत इष्टदेवतां स्मरतस्तस्य सोश्वो वटवृक्षस्य तले निष्क्रान्तः । चौरोपि वटप्ररोहमासाद्य तत्रैव विलग्नः । ततो द्वावपि तौ पृथग्भूतौ परमानन्दभाजौ जीवितविषये लब्धप्रत्याशौ संपन्नौ । अथ तत्र वटे कश्चिद्राक्षससुहृद्वानरः

सर्वैः लक्षणैः सम्पन्ना । जिहीर्षति हर्तुमिच्छति । कृतं रक्षोपधानं यस्याः ताम् । विकालः अयोग्यकालस्तस्य समये । विकालस्य नाम्नो राक्षसस्य समये आगमनकाले इति राक्षसावगतोर्थः । निशीथेऽर्धरात्रे । नगणितमग० खलीनस्याकर्षणं येन ।

---

१ कम्पज्वरादि०. २ मेव समागम्य. ३ स एष किल. ४ न्ति नैवमगणित. ५ वितं.

स्थित आसीत्। तेन राक्षसं त्रस्तमालोक्य व्याहृतम्। भो मित्र किमेवं पलाय्यते ऽलीकभयेन। त्वद्भक्ष्योऽयं मानुषः। भक्ष्यताम्। सोऽपि वानरवचो निशम्य स्वरूपमाधाय शङ्कितमनाः स्खलितगतिर्निवृत्तः। चौरोऽपि तं वानराहूतं ज्ञात्वा कोपात्तस्य लाङ्गूलं लम्बमानं मुखे निधाय चर्वितवान्। वानरोऽपि तं राक्षसाभ्याधिकं मन्यमानो भयान्न किंचिदुक्तवान्केवलं व्यथार्तो निमीलितनयनस्तिष्ठति यथा भवान्। राक्षसोऽपि तं तथाभूतमवलोक्य श्लोकमेनमपठत्।

यादृशी वदनच्छाया दृश्यते तव वानर।
विकालेन गृहीतोऽसि यः परैति स जीवति॥ ८४॥

प्रनष्टश्च। तत्प्रेषय मां येन गृहं गच्छामि। त्वं पुनरनुभुङ्क्ष्वात्र स्थित एव लोभवृक्षफलम्। चक्रधरः प्राह। भो अकारणमेतत्। दैववशात्संपद्यते नृणां शुभाशुभम्। उक्तं च।

दुर्गं त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाच्च वित्तम्।
शास्त्रं च यस्योशनसा प्रणीतं स रावणो दैववशाद्विपन्नः॥ ८९॥

तथा च।

अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका।
वयोऽप्यन्यायतः सिद्धाः संमुखे कर्माणि स्थिते॥ ८६॥

सुवर्णसिद्धिराह कथमेतत्। सोऽब्रवीत्।

कथा ११.

अस्त्यत्र धरातल उत्तरपथे मधुपुरं नाम नगरम्। तत्र मधुसेनो नाम राजा बभूव। तस्य कदाचिद्विषयसुखमनुभवतस्त्रिस्तनी कन्या बभूव। अथ तां त्रिस्तनीं जातां श्रुत्वा स राजा कञ्चुकिनः प्रोवाच। यद्भोस्त्यज्यतामियं त्रिस्तनी गत्वा दूरेऽरण्ये यथा कश्चिन्न जानाति। तच्छ्रुत्वा कञ्चुकिनः प्रोचुः। महाराज ज्ञायते यदनिष्टकारिणी त्रिस्तनी कन्या भवति। तथापि ब्राह्मणा आहूय प्रष्टव्या येन लोकद्वयं न विरुध्यते। यतः।

यः सततं परिपृच्छति शृणोति संधारयत्यनिशम्।
तस्य दिवाकरकिरणैर्नलिनीव विवर्धते बुद्धिः॥ ८७॥

त्रिकूटः पर्वतविशेषः। मधुपुरं मथुरेति प्रसिद्धा पुरी।

---

१ दुर्गः. २ चिन्तयस्व.

तथा च ।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोपि प्रश्नान्मुक्तो द्विजः पुरा ॥ ८८ ॥

राजाह । कथमेतत् । ते प्रोचुः ।

कथा १२.

देव कस्मिंश्चिद्वनोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमताटव्यां कश्चिद्ब्राह्मणः समासादितः । ततस्तस्य स्कन्धमारुह्य प्रोवाच भो अग्रे सरो गम्यताम् । ब्राह्मणोपि भयत्रस्तमनास्तमादाय प्रस्थितः । अथ तस्य कमलोदरकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् भोः किमेवंविधौ ते पादावतिकोमलौ । राक्षस आह भो व्रतमस्ति । नाहमार्द्रपादो भूमिं स्पृशामि । ततस्तच्छ्रुत्वात्मनो मोक्षोपायं चिन्तयंस्तत्सरः प्राप्तः । ततो राक्षसेनाभिहितम्-भो यावदहं स्नानं कृत्वा देवतार्चनाविधिं विधायागच्छामि तावत्त्वयातः स्थानान्नान्यत्र गन्तव्यम् । तथानुष्ठिते द्विजश्चिन्तयामास । नूनं देवतार्चनविधेरूर्ध्वं मामेष भक्षयिष्यति । तद्द्रुततरं गच्छामि येनैष आर्द्रपादो न मम पृष्ठमेष्यति । तथानुष्ठिते राक्षसो व्रतभङ्गभयात्तस्य पृष्ठं न गतः । अतोहं ब्रवीमि पृच्छकेन सदा भाव्यं इति । अथ तेभ्यस्तच्छ्रुत्वा राजा द्विजानाहूय प्रोवाच । भो ब्राह्मणाः त्रिस्तनी मे कन्या संपन्ना । तत्किं तस्याः प्रतिविधानमस्ति न वा । ते प्रोचुः देव श्रूयताम्—

हीनाङ्गी वाधिकाङ्गी वा या भवेत्कन्यका नृणाम् ।
भर्तुः स्यात्सा विनाशाय स्वशीलनिधनाय च ॥ ८९ ॥
या पुनस्त्रिस्तनोपेता याति लोचनगोचरम् ।
पितरं नाशयत्येव सा द्रुतं नात्र संशयः ॥ ९० ॥

तस्मादस्या दर्शनं परिहरतु देवः । तथा यदि कश्चिदुद्वाहयति तदेनां तस्मै दत्त्वा देशत्यागेन नियोजयितव्य इति । एवं कृते लोकद्वयाविरुद्धता भवति । अथ तेषां तद्वचनमाकर्ण्य स राजा पटहशब्देन सर्वत्र घोषणामाज्ञापयामास अहो त्रिस्तनीं राजकन्यां यः कश्चिदुद्वाहयति स सुवर्णलक्षमाप्नोति देशत्यागं च । एवं तस्यामाघोषणायां क्रियमाणायां म-

---

कमलस्योदरं तदिवकोमलौ । आर्द्रौ पादौ यस्य स आर्द्रपादः । हीनं न्यूनं अङ्गं यस्याः सा हीनाङ्गी । निधनाय नाशाय ।

---

१ अग्रसरः.

हान्कालो व्यतीतः । न कश्चित्तां प्रतिगृह्णाति । सापि यौवनोन्मुखी संजाता सुगुप्तस्थानस्थिता यत्नेन रक्ष्यमाणा तिष्ठति । अथ तत्रैव नगरे कश्चिदन्धास्तिष्ठति । तस्य च मन्थरकनामा कुब्जोऽग्रेसरो यष्टिग्राही । ताभ्यां तं पटहशब्दमाकर्ण्य मिथो मन्त्रितम् । स्पृश्यतेयं पटहो यदि कथमपि दैवात्कन्या लभ्यते तथा सुवर्णप्राप्तिश्च भवति । सुखेन सुवर्णप्राप्त्या कालो व्रजति । अथ यदि तस्या दोषतो मृत्युर्भवति दारिद्र्योपात्तस्यास्य क्लेशस्य पर्यन्तो भवति । उक्तं च ।

लज्जा स्नेहः स्वरविशदता बुद्धयः सौमनस्यं
प्राणोनङ्गः स्वजनममता दुःखहानिर्विलासाः ।
धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता
सर्वैः पूर्णे जठरपिठरे प्राणिनां संभवन्ति ॥ ९१ ॥

एवमुक्त्वान्धेन गत्वा स पटहः स्पृष्टः । भो अहं तां कन्यामुद्वाहयामि यदि राजा मे प्रयच्छति । ततस्तै राजपुरुषैर्गत्वा राज्ञे निवेदितम्—देव अन्धकेन केनचित्पटहः स्पृष्टः । तदत्र विषये देवः प्रमाणम् । किं क्रियतामिति । राजा प्राह—

अन्धो वा बधिरो वापि कुष्ठी वाप्यन्त्यजोपि वा ।
प्रतिगृह्णातु तां कन्यां सलक्षां स्याद्विदेशगः ॥ ९२ ॥

अथ राजादेशात्ते रक्षापुरुषैस्तं नदीतीरे नीत्वा सुवर्णलक्षेण समं विवाहविधिना त्रिस्तनीं तस्मै दत्त्वा जलयाने निधाय कैवर्ताः प्रोक्ताः । भो देशान्तरं नीत्वा कस्मिंश्चिदधिष्ठानेन्धः सपत्नीकः कुब्जकेन सह मोचनीयः । तथानुष्ठिते विदेशमासाद्य कस्मिंश्चिदधिष्ठाने कैवर्तदर्शिते ते त्रयोपि मूल्येन गृहं प्राप्ताः सुखेन कालं नयन्ति स्म । केवलमन्धः पर्यङ्के सुप्तस्तिष्ठति । गृहव्यापारं मन्थरकः करोति । एवं गच्छता कालेन त्रिस्तन्याः कुब्जकेन सह विकृतिः समपद्यत । अथवा साध्विदमुच्यते ।

यदि स्याच्छीतलो वह्निश्चन्द्रमा दहनात्मकः ।
सुस्वादः सागरः स्त्रीणां तत्सतीत्वं प्रजायते ॥ ९३ ॥

अथान्येद्युस्त्रिस्तन्या मन्थरकोऽभिहितः । भोः सुभग यद्येषोन्धः कथंचिद्व्यापाद्यते तदावयोः सुखेन कालो याति । तदन्विष्यतां कुत्रचिद्विषं येनास्मै तत्प्रदाय सुखिनी भवामि । अन्यदा कुब्जकेन परि-

---

दारिद्र्यंणापात्तो जानस्तस्य । विशदता स्पष्टता । सुमनसो भावः सौमनस्यम् । प्राणो बलम् । सुरगुरुवन्मतिः । कैवर्ता धीवराः । अन्येद्युः अन्यस्मिन् दिवसे ।

---

१ मधुरता. २ यौवनश्रीः. ३ कान्तासंगः. ४ पठनसमता. ५ पूर्णे सर्वे.

भ्रमता मृतः कृष्णसर्पः प्राप्तः । तं गृहीत्वा प्रहृष्टमना गृहमभ्येत्य तामाह सुभगे लब्धोयं कृष्णसर्पः । तदेनं खण्डशः कृत्वा प्रभूतशु॰ ण्ठ्यादिभिः संस्कार्यामुष्मै विकलनेत्राय मत्स्यामिषं भणित्वा प्रयच्छ येन द्राग्विनश्यति यतोस्य मत्स्यस्यामिषं सदा प्रियम् । एवमुक्त्वा मन्थरको बाह्ये गतः । सापि प्रदीप्तवह्नौ कृष्णसर्पं खण्डशः कृत्वा स्थाल्यामाधाय तक्रमादाय गृहव्यापाराकुला तं विकलाक्षं सप्रश्रयमुवाच । आर्यपुत्र तवाभीष्टं मत्स्यमांसं समानीतं यतस्त्वं सदैव तत्पृच्छसि । ते च मत्स्याः वह्नौ पाचनाय तिष्ठन्ति । तद्यावदहं गृहकृत्यं करोमि तावत्त्वं दर्वीमादाय क्षणमेकं तान्प्रचालय । सोपि तदाकर्ण्य हृष्टमनाः सृक्कणी परिलिहन्द्रुतमुत्थाय दर्वीमादाय प्रमथितुमारब्धः । अथ तस्य मत्स्यान्मथ्नतो विषगर्भबाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्यामगलत् । असावप्यन्धो बहुगुणं मन्यमानो विशेषान्नेत्राभ्यां बाष्पग्रहणमकरोत् । ततो लब्धदृष्टिर्जातो यावत्पश्यति तावत्तक्रमध्ये कृष्णसर्पखण्डानि केवलान्येवावलोकयति । ततो व्यचिन्तयत् अहो किमेतत् । मम मत्स्यामिषं कथितमासीदनया । एतानि तु कृष्णसर्पखण्डानि तत्तावद्विजानामि सम्यक् । त्रिस्तन्याश्चेष्टितं किं मम वधोपायक्रमः कुब्जस्य वोताहो अन्यस्य वा कस्यचित् । एवं विचिन्त्य स्वाकारं गूहन्नन्धवत्कर्म करोति यथा पुरा । अत्रान्तरे कुब्जः समागत्य निःशङ्कतयालिङ्गनचुम्बनादिभिस्त्रिस्तनीं सेवितुमुपचक्रमे । सोप्यन्धस्तमवलोकयन्नपि यावन्न किंचिच्छस्त्रं पश्यति तावत्कोपव्याकुलमनाः पूर्ववच्छयनं गत्वा कुब्जं चरणाभ्यां संगृह्य सामर्थ्यात्स्वमस्तकोपरि भ्रामयित्वा त्रिस्तनीं हृदये व्यताडयत् । अथ कुब्जप्रहारेण तस्यास्तृतीयः स्तन उरसि प्रविष्टः । तथा बलान्मस्तकोपरि भ्रामणेन कुब्जः प्राञ्जलतां गतः । अतोहं ब्रवीमि । अन्धकः कुब्जकश्चैव इति । सुवर्णसिद्धिराह भोः सत्यमेतत् । दैवानुकूलतया सर्वं कल्याणं संपद्यते । तथापि पुरुषेण सतां वचनं कार्यम् । यः पुनरेवमेव वर्तते स त्वमिव विनश्यति । तथा च ।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः ।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ ९४ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

प्रभूतानि शुण्ठ्यादीनि तैः । विषं गर्भे यस्य स विषगर्भः स चासौ बाष्पश्च तेन । प्राञ्जलतां सरलताम् ।

---

१ दैवमंगीकृत्य न नयस्त्याज्यो यथा त्वया मम वचनं नानुष्ठितम् । तथापि.
२ न पु॰ यो तते.

कथा १३।

कस्मिंश्चित्सरोवरे भारण्डनामा पक्ष्येकोदरः पृथग्ग्रीवः प्रतिवसति स्म। तेन च समुद्रतीरे परिभ्रमता किंचित्फलममृतकल्पं तरंगाक्षिप्तं संप्राप्तम्। सोपि भक्षयन्निदमाह। अहो बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहृतानि फलानि भक्षितानि। परमपूर्वोस्यास्वादः। तत्किं पारिजातहरिचन्दनतरुसंभवम्। किं वा किंचिदमृतमयफलमव्यक्तेनापि विधिनापतितम्। एवं तस्य ब्रुवतो द्वितीयमुखेनाभिहितम्—भो यद्येवं तन्ममापि स्तोकं प्रयच्छ येन जिह्वासौख्यमनुभवामि। ततो विहस्य प्रथमवक्त्रेणाभिहितम्—आवयोस्तावदेकमुदरमेका तृप्तिश्च भवति। ततः किं पृथग्भक्षितेन। वरमनेन शेषेण प्रिया तोष्यते। एवमभिधाय तेन शेषं भारण्ड्याः प्रदत्तम्। सापि तदास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसंभावनानेकचाटुपरा बभूव। द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति। अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम्। तद् दृष्ट्वापरमाह भो निस्त्रिंश पुरुषाधम निरपेक्ष मया विषफलमासादितम्। तत्तवापमानाद्भक्षयामि। अपरेणाभिहितम्—मूर्ख मा मैवं कुरु। एवं कृते द्वयोरपि विनाशो भविष्यति। अथैवं वदता तेनापमानेन फलं भक्षितम्। किं बहुना द्वावपि विनष्टौ। अतोहं ब्रवीमि। एकोदराः पृथग्ग्रीवाः इति। चक्रधर आह। सत्यमेतत्। तद्गच्छ गृहम्। परमेकाकिना न गन्तव्यम्। उक्तं च—

> एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।
> एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत्॥ ९५॥

अपि च।

> अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः।
> कर्कटेन द्वितीयेन जीवितं परिरक्षितम्॥ ९६॥

सुवर्णसिद्धिराह। कथमेतत्। सोब्रवीत्।

कथा १४.

कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तनामा ब्राह्मणः प्रतिवसति स्म। स च प्रयोजनवशाद्ग्रामे प्रस्थितः स्वमात्राभिहितः यद्वत्स कथमेकाकी व्रजसि। तदन्विष्यतां कश्चिद्द्वितीयः सहायः। स आह अम्ब मा भैषीः। निरुपद्र-

---

अव्यक्तेनालक्षितेन। आलिंगनं च संभावना चानेकाः चाटवश्च तत्परा।

---

१ सभाषा. २ सर्पात्पान्थः प्ररक्षितः

वीर्यं मार्गः। कोऽयं त्रशादेकाकी गमिष्यामि। अथ तस्य तं निश्चयं ज्ञात्वा समीपस्थवाप्याः सकाशात्कर्कटमादाय मात्राभिहितः—वत्स अवश्यं यदि गन्तव्यं तदेष कर्कटोपि सहायः। तदेनं गृहीत्वा गच्छ। सोपि मातुर्वचनादुभाभ्यां पाणिभ्यां तं संगृह्य कर्पूरपुटिकामध्ये निधाय पात्रमध्ये संक्षिप्य शीघ्रं प्रस्थितः। अथ गच्छन्ग्रीष्मोष्मणा संतप्तः कंचिन्मार्गस्थं वृक्षमासाद्य तत्रैव प्रसुप्तः। अत्रान्तरे वृक्षकोटरान्निर्गत्य सर्पस्तत्समीपमागतः। सोपि कर्पूरसुगन्धसहजप्रियत्वात्तं परित्यज्य वस्त्रं विदार्याभ्यन्तरगतां कर्पूरपुटिकामतिलौल्यादभक्षयत्। सोपि कर्कटस्तत्रैव स्थितः सन्सर्पप्राणानपाहरत्। ब्राह्मणोपि यावत्प्रबुद्धः पश्यति तावत्समीपे कृष्णसर्पो निजपार्श्वे कर्पूरपुटिकोपरि मृतस्तिष्ठति। तं दृष्ट्वा व्यचिन्तयत् कर्कटेनायं हतः। इति प्रसन्नो भूत्वाब्रवीत्-भोः सत्यमभिहितं मम मात्रा यत्पुरुषेण कोपि सहायः कार्यो नैकाकिना गन्तव्यम्। ततो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम्। तेनाहं कर्कटेन सर्पव्यापादनाद्रक्षितः। अथवा साध्विदमुच्यते—

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी॥ ९७॥

एवमुक्त्वासौ ब्राह्मणो यथाभिप्रेतं गतः। अतोहं ब्रवीमि। अपि कापुरुषो मार्गे। इति

ततश्च सुवर्णसिद्धिरपि तं चक्रधरं ब्राह्मणो यथानुज्ञाप्य स्वगृहं गतः। समाप्तं चेदमपरीक्षितकारकं नाम पञ्चमं तन्त्रम्।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रके अपरीक्षितकारकं नाम पञ्चमं तन्त्रं समाप्तम्।

समाप्तं चेदं पञ्चतन्त्रकं नाम नीतिशास्त्रम्।

---

१ गुरुका. २ पो विदारितवक्त्रोऽनभक्षितकर्पूरपिटिको मृतः ३ स्थितः. ४ द्वितीयः कापुरुषोपि सखा कार्यः. ५ अस्मात्प्राक्—क्षीणः स्रवति शशी रविवृद्धो वर्धयति पाथसां नाथम्। अन्ये विपदि सहाया धनिनां श्रियमनुभवन्त्यन्ये॥ इत्यधिकं पद्यं ए. पु०.

NOTES.

———:o:———

TANTRA IV.

P. 1. लब्धप्रणाशम्—लब्ध० the loss of what was gained; hence ०शं the book descriptive of it.

समुत्पन्नेषु का०—Loc. Abs. He alone whose intellect (presence of mind) does not fail him when occasions (lit. things or works to be accomplished) arise (*i. e.* under trying circumstances), surmounts (extricates himself from) a difficulty, as did the monkey when in the midst of water. समुत्पन्नेषु का० may also be taken as a simple Loc. One's intellect as regards works to be accomplished &c. The Abs., however, is better.

तद्यथानुश्रू०—The story runs thus (lit. is heard from mouth to mouth, related). उपकण्ठे—near the shore of. स्म—gives to the pres. the sense of the past tense; लट् स्मे Pán. III. 2. 118. कराल०—करालं jagged or pointed, hence frightful मुखं यस्य. ०सनाथे—Lit. having a master (नाथ); hence full of very soft sand. न्यविशत्—विश् with नि is more generally used in the sense of 'encamping, as in सेनानिवेश. समभ्या०—welcome.

2. A guest, who comes after the daily sacrifice (Vais'vadeva) is performed, whether welcome or hateful, whether a fool or a learned man, leads (the householder) to heaven. वैश्वदेव—a daily sacrifice offered with fresh food to all the gods before the morning and evening meals; see Manu III. 84. 121.

3. One should not ask a guest coming at the close of the Vais. and on the occasion of a S'ráddha (an anniversary, श्रद्धया विहितं श्राद्धं) his Charana (the school or branch of the Veda to which he belongs, such as that of the A'pastamba &c.); विद्या—sacred knowledge (*i. e.* of the Vedas and their *angas.*) &c.

4. दूर०—Wearied or tired by the fatigue of a long journey.

5. अपूजितः—Unhonoured, not hospitably received. विनिश्वसन्—breathing heavily (being dissatisfied or feeling insulted). गच्छन्ति &c.—The deities and his manes leave him with their faces turned away.

P. 2. एवंविधानि—Of this sort, such. भद्रे—a title of address indicative of affection. प्रीतिपूर्वम्—with feelings of joy, affectionately. अमृत०—full of, saturated with, nectar. तद्यदि &c.—If you have anything to do with me, your wife, (if you at all care for me, or want me for your wife). जरा०—The tasting of nectar is supposed to grant immunity from old age or death. प्रतिपन्नः—has become; is accepted as. मिथ्या०—Vain or foolish idea (or resolve or obstinacy.)

6. The mother gives birth to one kind of brothers speech to another. The wise declare that the brother by speech is superior to (is more important than) the brother by whole blood (lit. born of the same womb.)

अन्यथा०—not complied with or disobeyed (*i. e.* you have ever complied with my request). अनु०—Out of love for her. सम्यक्—properly, in your true colours. (*i. e.* as faithless to me and loving another.)

7. प्रयच्छसि—goes with वचनं and वाञ्छितं. यत् goes with every sentence. Since you do not reply to me joyfully nor do you grant any of my desires; since, for the most part, you heave sighs (indicative of unbearable separation) in quick succession and hot (burning) like flames of fire durning nights, &c. शिथि०—slackness, coldness. आदरात्—eagerly, lovingly. धूर्त—O cunning one, O deceiver. स्थिता—is certainly abiding in, has taken possession of.

पादौ०—having seized or taken hold of his wife's feet (as a mark of submission). कोप०—थाः—who had flown into the highest pitch of anger. सुदीनं—very meekly or submissively.

P. 3. 8. O passionate one, when I have prostrated myself at your feet and have become your servant (am ready to minister to your desires like a slave) why do you, darling of my heart, get angry with me?

अश्रु०—with her eyes flooded with tears.

9. O clever deceiver, that dearly loved one, on whom you have fastened a hundred sweet desires, is, indeed, stationed in your heart, attractive (though she is) by her feigned affection. One like myself has no admittance here (into your heart); have done, therefore, with this mockery of falling at my feet.

अपरं—moreover, another consideration is this that. भणितेपि—although I actually tell you. कः—of what consequence or significance. प्रायोप०—know that (*i. e.* be sure that) I will starve myself to death. See Tant. I. p. 44 and note thereon. चिन्ता०—his mind perturbed or distracted by anxiety.

10. वज्रलेप—the diamond-cement, things joined by which remain indelibly together. See I. 263. ग्रह—lit. seizure, grasp; in the case of नारीणां it means—the idea they once entertain (*i. e.* they never give it up). कथं स मे &c.—How can it be possible for me to kill him? सोद्वेगं—full of dejection, sorrowful. चिरवेलया—long after the usual time. निष्ठुरत०—Very harsh. उपजीव्य—having lived on the bounty of. प्रत्युप०—a return of the obligation. गृह०—Even by simply bringing him to our house. प्रायश्चि०—There is no atonement (for the sin of this your ingratitude.)

11. An expiatory rite is prescribed by the good (*i.e.* writers of Smṛtis) for one who kills a Bráhmana...for one who breaks his vows...;but there is none such for the ungrateful. Râmâ. IV. 34. 12. *Cf.* I. 278. The sl. occurs in Tantra 3rd also.

देवरं—Acc. sing. of देवृ or देवर,

P. 4. कलहा०-pre. p. of the den. fr. कलह. इयती-इयत्परिमाणमस्याः so much. ०चतुष्का-Who has drawn the ornamental square figures in powder (of chalk, burnet chaff &c. called in Mar. रांगोळी) which are usually drawn round the seat and dish or plaintain leaf (for dining) of a distiguished guest &c. प्रगुणित &c.—who has put on her best (प्रगुणित excellent) garments, jewels, rubies and other ornamens suitable for the occasion (or which it is proper to wear &c.); or this may mean-who has kept ready &c. for presentation. In this case dissolve the compound as प्रगुणितानि आभरणानि यया। वन्द-नमाला-A garland hung over a gateway like an arch. सो-त्कण्ठा—उत्कण्ठया सहिता full of eager expectation.

12. A man wiser (than others) should avoid a friend who is of the form of a weaver (*i. e.* selfish), who, being greedy always keeps pulling towards himself (*i. e.* secures his own interest). In the case of the weaver—who always draws towards himself the batten and the threads of the weft.

13. He (a friend is one who) gives and receives in his turn, tells his own secrets and asks (those of his friend), dines at the house of his friend and invites him to dine with himself. These are the six signs of friendship.

समुद्रान्ते—On the other side of the sea. अकृतभयः—without entertaining any fear. जल०प्लाव्यते—my body is washed over (deluged) with the billows or waves of water. मे वशः संजातः—has fallen into my power, is safe in my grip. तिलमात्रं—even a jot. वाक्येन-in compliance with my wife's word. ०विश्वास्य—having secured your confidence (lit. having caused you to confide in me). आमृष्टस्य—purified *i. e.* purged of its impurities; hence sweetened with. दोहद—a strong desire; usually this means the desire or longing of pregnancy. प्रत्यु०-प्रत्युत्पन्ना मतिर्यस्य ready witted, possessed of presence of mind.

P. 5. शून्यहृदयः—without the heart, not having the heart with me. शून्यमविद्यमानं हृदयं यस्य. अनश० तिष्ठति—lit. will rise from, will give up, her fasting. जल्पित०—who had promised to various deities worship with proper materials (for the safety of his life). दीर्घतर०—by a prodigious leap,

14. विश्वसेत्—is an anomalous form. It should properly be विश्वस्यात्. One should not trust an untrustworthy person, nor one in one's confidence either; for the danger arising from confidence (*i. e.* a person enjoying one's confidence) cuts off the very roots (of the confider). See Mah. Bha'. I. 142. 63.

15. He who wishes to gain over (make friends with) a friend once estranged (lit. affected by ill-feeling, evil-disposed) courts (invites) death like a female mule by conceiving.

सविलक्षं—with abashment, feeling ashamed of himself.

स्वचित्ता०—The object I had at heart, my secret motive. कथंचित् &c.—by some means comes to confide in me. हास्येन—by joking. ते अभि०—I ascertained what you would think of the matter. प्राघूर्णक०—In the manner of a guest. (The Mara. word पाहुणा is derived from this word; also occurring as प्राघुर्ण० प्राघुणकं &c.).

16. What sinful deed will a hungry man not do? Men reduced in wealth become cruel; good dame, tell Priyadarshana that Ganga. will not again come to the well.

P. 6. अस्ति—An introductory particle used at the beginning of tales. Originally it must have meant 'There is-as the story goes, there lived &c. दायादाः—दायमाददते इति; lit. those who take (inherit) a share of the paternal estate; hence all one's relations. See Ya'j. S. II. 263. उद्वेजितः-harassed or teased. अरघट्ट०—having mounted on a bucket attached to the water-machine (Mar. रहाट). प्रत्य०—How can I retaliate the injury.

17. I consider that man to be born again (after having been dead, as it were, owning to the insults suffered) who chastises (lit. wrongs in return) both the persons *viz.* him who has wronged him in times of adversity and him who has laughted at him when in straitened circumstances. *Cf.* Tant. I. 339.

18. To gain one's object one should set an enemy against an enemy; and against a powerful one, one more powerful still; for (thus) there will be no trouble in bringing about his (the enemy's) destruction; or, when the enemies are destroyed there will be no (further) molestation.

19. A wise (diplomatic) man should eradicate (root out) a powerful enemy, harassing him by a powerful one that he may gain happiness, as one removes a pointed (तीक्ष्ण) thorn by means of one (equally) pointed.

परिभाव्य—Having thus reflected in his mind. प्रियदर्शन—dear one (lit. one of charming aspect or one whose sight is longed for). संधानं—connection, (bond of) friendship. दुर्गे—in this hole serving me like a fortress.

20. One should not associate with a man whose character is not known &c. संश्रयः—place of residence. बृह०—A reputed writer on law and of a treatise on Niti (especially 'distiust or अविश्वास).

मन्त्रवादी—a reciter of (one who knows) the spell (of charming a serpent). औषध०—One skilled in the use of drugs which deaden a serpent. वैरमाश्रित्य—taking his stand on his enemity *i. e.* wishing to have his enemity avenged. कस्यचित्० &c.—calls me that I should bite some one (his enemy) अश्रद्धेयं—what cannot be believed, this is incredible, that grass should come in contact with (seek the company of) fire.

21. He who is the victim of another never approaches

him, even in a dream; why do you talk unmeaningly thus !

स्वभाव०—A natural enemy. परपरि०—owing to my having suffered insults at the hands of my enemies; being contemned or humiliated by my enemies.

P. 7. 22. When one's all is going to be lost and even life is threatened (is in danger) one should bow even to one's enemies and save life and wealth. संजाते should be taken to mean 'is about to be lost.'

पाषाण०—walled with stones piled up. नास्ति मम &c.—I cannot find entrance there. स्थान—a proper place, living in which &c.

23. That which it is possible to eat, which can be digested when eaten and which proves beneficial in the end (when assimilated in the system) a man, desirous of his welfare, should eat.

सुखोपायेन—by easy means; easily. तथा—Thus, to make the matter clear. तस्य—*i. e.* of the well. जलोपान्ते—near the water. कदाचित् &c.—Sometimes and with difficulty. सुखा०—contributing to happiness. कुला०—Lit. the burning charcoal to his family, the destroyer of his family (कुलस्य अंगार:). This sometimes also means 'the bane of one's family (कुले अंगार इव).

24. The wise man who is reduced in strength (प्राणैः परिक्षीण: whose life blood is sapped) and is without helpers should contrive to gain a livelihood which might prove to be the means of getting all kinds of happiness. Mah. Bha'. V. 34. 14.

तव वचनेन – According to your direction. अरघट्ट०--by the passage afforded by the buckets attached to the water-wheel. धृत्वा--having placed or lodged. मण्डूका०—No more frogs being left निःशे०—extirpated.

P. 8. मित्रकृत्यम्—(You have accomplished) the object or business of your friend. रुद्धं—Occupied. अत्रस्थस्य—To me who must stay here. स्ववर्गीय—of your own class

(family). व्याकुल०-distracted or perplexed at heart. निषेध० If I contradict or forbid him.

25. He, who forms friendship with his enemy who is his superior in valour, eats poison, no doubt, with his own hands.

26. Men of prudence (foresight) please with the gift of a part their enemy prepared to deprive them of their whole property as the sea does the sub-marine fire (with a small quantity of its water). Vâdava or Vâdavágni, also called Aurva (because produced from the wrath of that sage) was cast into the ocean by Aurva where it dries up a space of twelve *kosas* in extent.

27. The weak man who does not yield up peacefully even a little to a stronger person when asked to do so, or does not give what is pointed out to him, gives afterwards (when compelled to do so) a far greater quantity (lit. a Khári of flour). A Khâri is equal to a maund and a half.

28. When the loss of the whole impends, a wise man parts with a half (to save the other half); and he gets his purpose served (or, his want satisfied) with the half; for the loss of the whole is difficult to be borne.

29. A talented man should not allow much to be sacrificed for the sake of little: true wisdom lies in this that much should be saved as the cost of a trifle. See I. 19.

30. Just as a man with dirty clothes sits any where he likes (without the fear of soiling his clothes) so a person fallen from a virtuous course of conduct does (not care to) keep up what little character he has.

P. 9. तारस्वरेण—in a loud voice. धिग्धिक्प्रलाप०—incessantly uttering the cries of—fie upon me, woe me! न विरराम—*i. e.* continually kept on crying.

31. Why do you cry (now), you, whose cry is of no avail and who have brought down ruin on your family: when our partisans are destroyed who will save us! आत्मनो निष्क्र०—*i. e.* how to effect your own escape and to encom-

pass his death. गच्छता कालेन-In the course of time. कवलितं Lit. made mouthfuls of, eaten up; a denom. fr. कवल a mouthful. मयावास्थितेन—While I live. Inst. Abs. विविधदेवतो०—Having promised to offer worship and presents to various deities. तदाकांक्षया—eagerly expecting his return. गोधा—a lizard. स्तोक—a little. येन—by which you are to say. तव विरुद्धं—against you *i. e.* do harm to you. सुकृतमन्तरे &c.—Then I pledge (lit. place in the middle as a safe-guard) my religious merit. This is a sort of oath. He means—I won't do you harm on pain of losing my religious merit. विरूपकरणे—In the matter of doing you harm. निःशंकेन—with a mind free from all misgiving; fearless. दृष्टापायः—When I have seen danger in it.

P. 10. कृतघ्नतादोषम् &c.—Remove the blame of ingratitude attaching to me. He means—By my words I have appeared ungrateful to you. I wish to prove my gratitude. But that can be done only when you come to my house and return unharmed—all safe. Of course the Makara is trying (to lure him into his snare again). तवोपरि—*i. e.* the sin will fall to your lot (for having forced me to have recourse to this).

33. अकर्णहृदयः—having neither ears (to hear) nor a heart (mind to think).

